# SABDA MANJARI

**Enlarged Edition with a most interesting Chapter on Samasa, Foot-Notes and Glossary**

॥ विद्यया विन्दते अमृतम् ॥



# Sanskrit Study Made Easy Series

**A Reformed Series of Four Illustrated Sanskrit Readers.**
With Grammatical Conversational Exercises,
Glossary etc.,
For a Pleasant & Quick Study of Sanskrit.

Most widely used throughout India and Foreign Countries
Viz Ceylon, Siam Bangkok, Germany, Italy Australia,
California, San Francisco etc.

AND SELECTED BY THE EMBASSY OF INDIA
*and The Ministry of Education and Scientific Research of Govt. of India for Presentation to Foreign Students of Sanskrit*

# FOREWORD

'एकः शब्दः सुज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवति'

पातञ्जल महाभाष्यम्

Such is the Greatness of the संस्कृत भाषा which is also known as the 'देव भाषा' the language of the Gods. The script (लिपि) in which Sanskrit words are written is called 'देवनागरी'

The system of Sanskrit Grammar is the centre of an important and interesting subject for the study of the Ancient Vedic and Modern Sanskrit literatures. It is also the standard of Accuracy and the basis to produce sweet and precious expressions and win अक्षरलक्ष prizes as भोज-महाराज offered to his Court Pandits.

This book शब्दमञ्जरी will be a very simple and valuable Text for the proper study of the सुबन्त portion including अव्यय, समासप्रकरण etc. The तिङन्त portion, verb system, is likewise separately dealt with in a very analytical form in the धातुरूपमञ्जरी book.

The Special Features of this Edition are (1) the Simplified arrangement of the सर्वनामप्रकरणम्, (2) the addition of apt illustrations in Slokas for examples of various voices, (3) the inclusion of a very interesting chapter on वृत्तिप्रकरण giving apt illustration in charming Slokas and also in वाक्य for all the 5 वृत्तिs and (4) the adding of the method of 'आकाङ्क्षा' - Analysis of Sloka and sentence.

It is earnestly hoped that the production of such Simple and interesting Text Books will be a good service for the most easy and pleasant study of Sanskrit and as quickly as any other languages of the World.

Kalpathi, Palghat-3.
शार्वरि-चैत्रशुद्ध:
शुक्लप्रथमा 17—3—61

**L. Anantha Rama Sastri,**
*Vyakarana Siromani*

# शब्दमञ्जर्यां विषयानुक्रमणिका (CONTENTS)


| विषयाः | | | पृष्ठसङ्ख्या |
|---|---|---|---|
| | Foreword | ... | ३ |
| | सुबन्त प्रकरणम् | ... | ८—१०७ |
| १ | प्रस्तावना—Introduction | ... | ६ |
| २ | सुप्-प्रत्ययाः or विभक्तयः Cases | ... | ८ |
| ३ | वर्णमाला—अचः हलश्च—Sanskrit Alphabet | | ९ |
| ४ | विभक्तीनां प्रयोगः ... | ... | १० |
| ५ | प्रार्थना; व्याकरणम् अवश्यं पठनीयं च | ... | ११ |
| ६ | साधारण शब्द विभागः ... | .... | १५—५७ |
| | (१) अजन्त पुंलिङ्ग प्रकरणम् | ... | १५ |
| | (२) अजन्त स्त्रीलिङ्ग प्रकरणम् | ... | २१ |
| | (३) अजन्त नपुंसकलिङ्ग प्रकरणम् | .... | २७ |
| | (४) हलन्त पुंलिङ्ग प्रकरणम् | ... | ३१ |
| | (५) हलन्त स्त्रीलिङ्ग प्रकरणम् | ... | ४५ |
| | (६) हलन्त नपुंसकलिङ्ग प्रकरणम् | ... | ५१ |
| ७ | सर्वनाम शब्दप्रकरणम्—Pronouns | ... | ५८—७२ |
| ८ | सङ्ख्या शब्द प्रकरणम्—Numerals | ... | ७३—८६ |
| | (१) सङ्ख्या शब्दाः ... | ... | ७३ |
| | (२) सङ्ख्येय शब्दाः ... | ... | ७७ |
| | (३) सङ्ख्या-सङ्ख्येय शब्दाः | ... | ८१ |
| ९ | विशेष शब्द विभागः .... | ... | ८७—१०७ |
| | (१) अजन्त पुंलिङ्ग प्रकरणम् | ... | ८७ |
| | (२) अजन्त स्त्रीलिङ्ग प्रकरणम् | ... | ९४ |
| | (३) अजन्त नपुंसकलिङ्ग प्रकरणम् | ... | ९४ |

| विषयाः | | पृष्ठसङ्ख्या |
|---|---|---|
| | (४) हलन्त पुंलिङ्ग प्रकरणम् ... | ९९ |
| | (५) हलन्त स्त्रीलिङ्ग प्रकरणम् ... | १०५ |
| | (६) हलन्त नपुंसकलिङ्ग प्रकरणम् ... | १०७ |
| १० | तिङन्त प्रकरणम्—Conjugation of verbs | १०८—१२१ |
| | (१) प्रस्तावना—Introduction ... | १०८ |
| | (२) प्रथम गणः—भ्वादिः ... | ११३ |
| | (३) द्वितीय गणः—अदादिः ... | ११७ |
| | (४) अष्टम गणः—तनादिः ... | ११८ |
| ११ | प्रयोगनिरूपणम्—Voices ... ... | १२२—१२५ |
| १२ | वृत्तयः—पञ्च ... ... | १२६—१४४ |
| | (१) कृद्वृत्तिः ... ... | १२६ |
| | (२) तद्धितवृत्तिः ... ... | १२७ |
| | (३) सनाद्यन्तधातुवृत्तिः—पञ्चविधा ... | १२७ |
| | (४) एकशेषवृत्तिः ... ... | १२९ |
| | (५) समासवृत्तिः ... ... | १३० |
| १३ | आकाङ्क्षा—Analysis ... ... | १४३ |
| १४ | अव्ययप्रकरणम्—Indeclinables ... | १४५—१५४ |
| | प्रस्तावना—Introduction ... | १४५ |
| | (१) अव्ययीभाव, (२) क्रियाविशेषण, | |
| | (३) सुबन्त, (४) तिङन्त, (५) तद्धितान्त, ... | १४६ |
| | (६) कृदन्त, (७) सर्वनाम अव्ययानि ... | १४७ |
| | (८) सङ्ख्या, (९) कालवाचकान्यव्ययानि, ... | १४८ |
| | (१०) अन्यानि कानिचिदव्ययानि ... | १४९ |
| १५ | शब्दार्थकोश:—Glossary ... | १५४ |

# INTRODUCTION

—: o :—

The words of Sankrit Language are classified under two main groups.

1. 'सुबन्त' or नामपदम् i. e. having the 'सुप्' or विभक्ति Termination - Declinables.

e. g. रामः, रमा, फलं etc.

2. 'तिङन्त' or क्रियापदम् having the तिङ् or पुरुषप्रत्यय Terminations of verbs e. g. भवति, वन्दते etc.

Those words which cannot be declined or conjugated are termed as Indeclinables or अव्ययs

e. g. यदा, तदा, अद्य etc.

Adverbs, Prepositions or Prefixes and Conjunctions are grouped under अव्यय.

'सुबन्त' Sabdas are grouped under the following four classes.

| | | | |
|---|---|---|---|
| 1. | विशेषण शब्दाः | Adjectives | मधुरः, शुक्लः, शुचिः इत्यादयः |
| 2. | विशेष्य शब्दाः | Nouns | रामः, दधि, मधु ,, |
| 3. | सर्वनाम शब्दाः | Pronouns | सः त्वम्, अहम् ,, |
| 4. | सङ्ख्या शब्दाः | Cardinals (Numerals) | एकम्, द्वे, त्रीणि ,, |

The above groups are declined to show (1) Gender or लिङ्ग (2) Number or वचन and (3) Case or विभक्ति.

There are three Genders (1) Masculine (पुंलिङ्ग) (2) Feminine (स्त्रीलिङ्ग) and Neuter (नपुंसकलिङ्ग)

There are Three Numbers or वचन.

1. Singular एकवचन Showing One
2. Dual द्विवचन Showing Two
3. Plural बहुवचन Showing more than Two.

There are Eight cases or विभक्तयः. Vide separate Table with प्रत्ययाs and Meanings on Page 8. Cases show the relation of the शब्द to the governing words.

There are 13 vowels - अचः or स्वराः The words ending in अचः are called अजन्ताः

There are 33 consonants हलः or व्यञ्जनानि. The words ending in हलः are called हलन्ताः.

The declension of Sabdas are dealt here in the above order. Where there is an omission of words ending in some letters it is to be noted that no Sabda exists in that वर्ण.

Verbs are formed out of Roots (धातु) and are conjugated to show Number, Person and Tense or moods. Details are given on Page 108.

---

## 'सुप्' प्रत्ययः or विभक्तयः = Cases (Eight in Number).

| Sanskrit Names | English Names. | 'सुप्' प्रत्ययाः (case endings) | | | Meanings. |
|---|---|---|---|---|---|
| प्रथमा | Nominative | स् | औ | अस् | Subject (in a Sentence) |
| संबोधन-प्रथमा | Nominative of address or Vocative | स् | औ | अस् | (To address a person or thing) हे! Oh! |
| द्वितीया | Accusative | अम् | औ | अस् | Object (of a transitive verb) |
| तृतीया | Instrumental | आ | भ्यां | भिस् | (Sense of Preposition) By, with, Bymeans of |
| चतुर्थी | Dative | ए | भ्यां | भ्यस् | To, For, |
| पञ्चमी | Ablative | अस् | भ्यां | भ्यस् | From, Out of, Than. |
| षष्ठी | Genitive | अस् | ओस् | आम् | Of, Among, Belonging to |
| सप्तमी | Locative | इ | ओस् | सु | In, on, At, Among |

अत्र प्रत्ययानाम् (Case Endings,) अन्ते श्रूयमाणाः सकाराः विसर्गाः भवन्ति ॥

## ॥ वर्णमाला ॥

## The Sanskrit Alphabet Consists of 46 Letters (13 Vowels and 33 Consonants.)

### अचः (स्वराः) = Vowels 13.

अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ए, ऐ, ओ, औ

Out of the above the 5 vowels अ, इ, उ, ऋ, and ऌ are ह्रस्वाः (Short vowels) and the 8 vowels आ, ई, ऊ, ॠ ए, ऐ, ओ and औ are दीर्घाः (Long vowels) ॥

हलः (व्यञ्जनानि) = Consonants 33, in Eight Groups,

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| १. | क् | ख् | ग् | घ् | ङ् | कण्ठ्याः | — Gutturals | (क वर्गः) |
| २. | च् | छ् | ज् | झ् | ञ् | तालव्याः | — Palatals | (च वर्गः) |
| ३. | ट् | ठ् | ड् | ढ् | ण् | मूर्धन्याः | — Linguals | (ट वर्गः) |
| ४. | त् | थ् | द् | ध् | न् | दन्त्याः | — Dentals | (त वर्गः) |
| ५. | प् | फ् | ब् | भ् | म् | ओष्ठ्याः | — Labials | (प वर्गः) |

६. { य् Palatal; र् Lingual; ल् Dental; व् Dental and Labial } — अन्तःस्थाः or Semi-Vowels

७. { श् Palatal; ष् Lingual; स् Dental } — ऊष्माणः or Sibilants

८. ह् .... Aspirate

The last three letters of each of the first five groups or वर्गाः together with the semi vowels and the aspirate are called *Soft Consonants* (मृदु). The rest are called *Hard Consonants*. (कठोर)

Besides the above 46 letters there are two more sounds known as अनुस्वार (ं) विसर्ग (ः) ॥

## विभक्तीनां प्रयोगः—The usage of cases.

—:o:—

The following Slokas show the usage of all cases in राम, कृष्ण and गुरु Sabdas in एकवचन.

१. 'राम' शब्दः—

| | | |
|---|---|---|
| प्रथमा | —श्रीरामः | शरणं समस्तजगतां |
| द्वितीया | —रामं | विना का गतिः |
| तृतीया | —रामेण | प्रतिहन्यते कलिमलं |
| चतुर्थी | —रामाय | कार्यं नमः । |
| पञ्चमी | —रामात् | त्रस्यति कालभीमभुजगो |
| षष्ठी | —रामस्य | सर्वं वशे |
| सप्तमी | —रामे | भक्तिरखण्डिता भवतु मे |
| संबोधन प्रथमा | —राम ! | त्वमेवाश्रयः ॥ |

२. 'कृष्ण शब्दः—

कृष्णो रक्षतु मां चराचरगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः ।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे भक्तिरचञ्चलाऽस्तु भगवन् हे कृष्ण तुभ्यं नमः॥

३. 'गुरु' शब्दः—

गुरुरेव गतिः गुरुमेव भजे, गुरुणैव सहास्मि, नमो गुरवे ।
न गुरोः परमं, शिशुरस्मि गुरोः, मतिरस्ति गुरौ मम, पाहि गुरो !॥

॥ श्रीरामजयम् ॥

॥ ॐ नमः श्रीशब्दब्रह्मात्मने श्रीनटराजराजाय नमः ॥

ॐ नमः श्रीशब्दविद्या संप्रदाय कर्तृभ्यो नमो महद्भ्यो नमो गुरुभ्यः ।

## प्रार्थना-Prayer

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १
येनाक्षरसमाम्नायम् अधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ २
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ ३
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ ४
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥ ५
यः शिवो नामरूपाभ्यां या देवी सर्वमङ्गळा ।
तयोः संस्मरणात् पुंसां सर्वतो जयमङ्गलम् ॥ ६

---

१. वागर्थप्रतिपत्ति= The right understanding of the words and their meanings ; वन्दे=(I) salute.

२. अधिगम्य=having obtained ; कृत्स्नं=entire.

३. गिरः=words ; तमः=darkness ; भिन्नं=removed.

४. अज्ञान=Ignorance ; शलाका=brush ; उन्मीलित=opened.

५. मुनित्रयम्=पाणिनि वररुचि and पतञ्जलि.

६. सर्वतः=always ; जय=Victory; मङ्गळ=auspicious,

Study of व्याकरणम् is essential and

is very interesting too

शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे ।
रोद्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना ॥ १ ॥

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं, सकृत् शकृत् ॥२॥

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ ३ ॥

अपि च—

मुखं व्याकरणं प्रोक्तम् । शब्दानां अनुशासनं व्याकरणम् ॥
महाभाष्यं वा पठनीयम् ! महाराज्यं वा शासनीयम् !!
तस्मात्—सर्वप्रयत्नेन व्याकरणपटुर्भव !!!

---

१. शब्दशास्त्र Grammar ; रोद्धुं=to tie ; हस्ती=Elephant ;
कमलनालतन्तु=Lotus stern fibre,

२. तथापि=even then ; पठ=study ; स्वजन:=relatives ;
श्वजन:=dogs ; सकलं=entire ; शकलं=bit ;
सकृत्=once ; शकृत्=ordure.

३. सुस्वर=Good voice ; अक्षरव्यक्ति=clear letters ;
गुणा:=qualifications,

अनुशासनं Instruction.

महाभाष्यं=भगवत् पतञ्जलिकृत व्याकरण महाभाष्यम् ।

व्याकरणपटु=eloquent in Grammar, भव=may become.

FOR NOTES

FOR NOTES

॥ श्रीरामजयम् ॥

* विद्यया विन्दते अमृतम् *

# ॥ शब्दमञ्जरी ॥

---

## साधारण शब्द विभागः

## अजन्त पुंलिङ्ग प्रकरणम्

### १. अकारान्तः पुंलिङ्गः 'राम' शब्दः (Rama)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| सं. प्रथमा | हे राम | हे रामौ | हे रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण* | रामाभ्यां | रामैः |
| चतुर्थी | रामाय | रामाभ्यां | रामेभ्यः |
| पञ्चमी | रामात् | रामाभ्यां | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम्* |
| सप्तमी | रामे | रामयोः | रामेषु |

एवम् देव, मुकुन्द, शिव, हर प्रभृतयः

---

* In तृतीया एकवचन and षष्ठी बहुवचन the letter न् will be generally, changed to ण् when it comes after र्, ष् or ऋ c.f.: देवेन, मुकुन्देन, etc,,

ee Panini's सूत्रम्—रषभ्यां नो णः समानपदे ॥

## २. इकारान्तः पुंलिङ्गः 'हरि' शब्दः (Vishnu)

| | | | |
|---|---|---|---|
| प्र. | हरिः | हरी | हरयः |
| सं. प्र. | हे हरे | हे हरी | हे हरयः |
| द्वि. | हरिम् | हरी | हरीन् |
| तृ. | हरिणा | हरिभ्यां | हरिभिः |
| च. | हरये | हरिभ्यां | हरिभ्यः |
| प. | हरेः | हरिभ्यां | हरिभ्यः |
| ष. | हरेः | हर्योः | हरीणाम् |
| स. | हरौ | हर्योः | हरिषु |

एवं रवि, कवि, मुनि, विधि, श्रीपति प्रभृतयः

---

## ३. इकारान्तः पुंलिङ्गः* 'पति' शब्दः (Master, Husband)

| | | | |
|---|---|---|---|
| प्र. | पतिः | पती | पतयः |
| सं. प्र. | हे पते | हे पती | हे पतयः |
| द्वि. | पतिम् | पती | पतीन् |
| तृ. | पत्या | पतिभ्यां | पतिभिः |
| च. | पत्ये | पतिभ्यां | पतिभ्यः |

---

*पति and सखि are irregular bases in इकारान्त। The words पति, however is declined like हरि when it stands at the end of a compound.

*viz* श्रीपति, सीतापति, भूपति, नृपति

| | | | |
|---|---|---|---|
| प. | पत्युः | पतिभ्यां | पतिभ्यः |
| ष. | पत्युः | पत्योः | पतीनाम् |
| स. | पत्यौ | पत्योः | पतिषु |

४. इकारान्तः पुंलिङ्गः ' सखि ' शब्दः (Friend)

| | | | |
|---|---|---|---|
| प्र. | सखा | सखायौ | सखायः |
| सं. प्र. | हे सखे | हे सखायौ | हे सखायः |
| द्वि. | सखायम् | सखायौ | सखीन् |
| तृ. | सख्या | सखिभ्यां | सखिभिः |
| च. | सख्ये | सखिभ्यां | सखिभ्यः |
| प. | सख्युः | सखिभ्यां | सखिभ्यः |
| ष. | सख्युः | सख्योः | सखीनाम् |
| स. | सख्यौ | सख्योः | सखिषु |

५. उकारान्तः पुंलिङ्गः ' गुरु ' शब्दः (Teacher)

| | | | |
|---|---|---|---|
| प्र. | गुरुः | गुरू | गुरवः |
| सं. प्र. | हे गुरो | हे गुरू | हे गुरवः |
| द्वि. | गुरुम् | गुरू | गुरून् |
| तृ. | गुरुणा | गुरुभ्यां | गुरुभिः |
| च. | गुरवे | गुरुभ्यां | गुरुभ्यः |

| | | | |
|---|---|---|---|
| प. | गुरोः | गुरुभ्यां | गुरुभ्यः |
| ष. | गुरोः | गुर्वोः | गुरूणाम् |
| स. | गुरौ | गुर्वोः | गुरुषु |

एवं शम्भु, विष्णु, भानु, सूनु प्रभृतयः

---

६. ऋकारान्तः पुंलिङ्गः * 'दातृ' शब्दः (Giver)

| | | | |
|---|---|---|---|
| प्र. | दाता | दातारौ | दातारः |
| सं. प्र. | हे दातः | हे दातारौ | हे दातारः |
| द्वि. | दातारं | दातारौ | दातॄन् |
| तृ. | दात्रा | दातृभ्यां | दातृभिः |
| च. | दात्रे | दातृभ्यां | दातृभ्यः |
| प. | दातुः | दातृभ्यां | दातृभ्यः |
| ष. | दातुः | दात्रोः | दातॄणाम् |
| स. | दातरि | दात्रोः | दातृषु |

एवं कर्तृ, धातृ, वक्तृ प्रभृतयः। नप्तृशब्दोऽप्येवमेव ॥

---

* Nouns derived from roots with the affix तृ such as धातृ, कर्तृ etc. are to be declined like दातृ। They form their feminines by the addition of स्त्रीप्रत्यय 'ई'—दात्री, धात्री, कर्त्री etc.

७. ऋकारान्तः पुंलिङ्गः 'पितृ' शब्दः (Father)

| | | | |
|---|---|---|---|
| प्र. | पिता | पितरौ | पितरः |
| सं प्र. | हे पितः | हे पितरौ | हे पितरः |
| द्वि. | पितरम् | पितरौ | पितॄन् |
| तृ. | पित्रा | पितृभ्यां | पितृभिः |
| च. | पित्रे | पितृभ्यां | पितृभ्यः |
| प. | पितुः | पितृभ्यां | पितृभ्यः |
| ष. | पितुः | पित्रोः | पितॄणां |
| स. | पितरि | पित्रोः | पितृषु |

एवं भ्रातृ, जामातृ, देवृ, सव्येष्टृ, नृ शब्दाः। 'नृ' शब्दस्य षष्ठीबहुवचने, 'नृणाम्' 'नॄणाम्' इति रूपद्वयं विशेषः॥

---

८. ऐकारान्तः पुंलिङ्गः * 'रै' शब्दः (Wealth)

| | | | |
|---|---|---|---|
| प्र. | राः | रायौ | रायः |
| सं प्र. | हे राः | हे रायौ | हे रायः |
| द्वि. | रायम् | रायौ | रायः |
| तृ. | राया | राभ्यां | राभिः |
| च. | राये | राभ्यां | राभ्यः |
| प. | रायः | राभ्यां | राभ्यः |

---

* 'रै' शब्दः 'गो' शब्दश्च स्त्रीलिङ्गेऽपि भवतः। रूपाणि तु पुंलिङ्गशब्दवत्॥

| | | | |
|---|---|---|---|
| ष. | रायः | रायोः | रायाम् |
| स. | रायि | रायोः | रासु |

---

९. ओकारान्तः पुंलिङ्गः 'गो' शब्दः (Bull)

| | | | |
|---|---|---|---|
| प्र. | गौः | गावौ | गावः |
| सं प्र. | हे गौः | हे गावौ | हे गावः |
| द्वि. | गाम् | गावौ | गाः |
| तृ. | गवा | गोभ्यां | गोभिः |
| च. | गवे | गोभ्यां | गोभ्यः |
| प. | गोः | गोभ्यां | गोभ्यः |
| ष. | गोः | गवोः | गवाम् |
| स. | गवि | गवोः | गोषु |

---

१०. औकारान्तः पुंलिङ्गः 'ग्लौ' (Moon) शब्दः

| | | | |
|---|---|---|---|
| प्र. | ग्लौः | ग्लावौ | ग्लावः |
| सं प्र. | हे ग्लौः | हे ग्लावौ | हे ग्लावः |
| द्वि. | ग्लावम् | ग्लावौ | ग्लावः |
| तृ. | ग्लावा | ग्लौभ्यां | ग्लौभिः |
| च. | ग्लावे | ग्लौभ्यां | ग्लौभ्यः |
| प. | ग्लावः | ग्लौभ्यां | ग्लौभ्यः |
| ष. | ग्लावः | ग्लावोः | ग्लावाम् |
| स. | ग्लावि | ग्लावोः | ग्लौषु |

इति अजन्त पुंलिङ्ग प्रकरणम् ॥

---

## अजन्त स्त्रीलिङ्ग प्रकरणम्

—.o:—

११. [1]आकारान्तः स्त्रीलिङ्गः 'रमा' शब्दः (Lakshmi)

| | | | |
|---|---|---|---|
| प्र. | रमा | रमे | रमाः |
| सं प्र. | हे रमे | हे रमे | हे रमाः |
| द्वि. | रमाम् | रमे | रमाः |
| तृ. | रमया | रमाभ्यां | रमाभिः |
| च. | रमायै | रमाभ्यां | रमाभ्यः |
| प. | रमायाः | रमाभ्यां | रमाभ्यः |
| ष. | रमायाः | रमयोः | रमाणाम् |
| स. | रमायाम् | रमयोः | रमासु |

एवं माला, सीता, क्षमा, लज्जा प्रभृतयः। 'अम्बा' 'अक्का' 'अल्ला' शब्दाः अप्येवमेव; किन्तु तेषां सम्बोधनप्रथमैकवचने 'हे अम्ब', 'हे अक्क', 'हे अल्ल' इति विशेषः॥

---

१२. [2]इकारान्तः स्त्रीलिङ्गः 'मति' शब्दः (Intellect)

| | | | |
|---|---|---|---|
| प्र. | मतिः | मती | मतयः |
| सं प्र. | हे मते | हे मती | हे मतयः |
| द्वि. | मतिम् | मती | मतीः |

---

1. स्त्रीलिङ्गे अकारान्तः शब्दाः न विद्यते।

2. All abstract nouns (भावशब्दाः) ending in ति *i.e.*, सृष्टि, कृति, गति, etc. are to be declined like मति॥

| | | | |
|---|---|---|---|
| तृ. | मत्या | मतिभ्यां | मतिभिः |
| च. | मत्यै - मतये,* | मतिभ्यां | मतिभ्यः |
| प. | मत्याः - मतेः, | मतिभ्यां | मतिभ्यः |
| ष. | मत्याः - मतेः, | मत्योः | मतीनाम् |
| स. | मत्याम्- मतौ, | मत्योः | मतिषु |

एवं श्रुति, रुचि, बुद्धि प्रभृतयः

१३. ईकारान्तः स्त्रीलिङ्गः 'नदी' शब्दः (River)

| | | | |
|---|---|---|---|
| प्र. | नदी | नद्यौ | नद्यः |
| सं. प्र. | हे नदि | हे नद्यौ | हे नद्यः |
| द्वि. | नदीम् | नद्यौ | नदीः |
| तृ. | नद्या | नदीभ्यां | नदीभिः |
| च. | नद्यै | नदीभ्यां | नदीभ्यः |
| प. | नद्याः | नदीभ्यां | नदीभ्यः |
| ष. | नद्याः | नद्योः | नदीनाम् |
| स. | नद्याम् | नद्योः | नदीषु |

एवं गौरी, वाणी, सखी, देवी, कर्त्री, दात्री प्रभृतयः। लक्ष्मी तरी, तन्त्री, शब्दानां तु प्रथमैकवचने लक्ष्मीः, तरीः, तन्त्रीः इति सविसर्गं रूपम्।

---

* स्त्रीलिङ्ग Words ending in 'इ' *i.e.*, मति, श्रुति, रुचि etc., have two forms in the Singular of चतुर्थी, पञ्चमी षष्ठी and सप्तमी.

१४. ईकारान्तः स्त्रीलिङ्गः 'श्री' शब्दः (Lakshmi)

| | | | |
|---|---|---|---|
| प्र. | श्रीः | श्रियौ | श्रियः |
| सं. प्र. | हे श्रीः | हे श्रियौ | हे श्रियः |
| द्वि. | श्रियम् | श्रियौ | श्रियः |
| तृ. | श्रिया | श्रीभ्यां | श्रीभिः |
| च. | श्रियै - श्रिये, | श्रीभ्यां | श्रीभ्यः |
| प. | श्रियाः - श्रियः, | श्रीभ्यां | श्रीभ्यः |
| ष. | श्रियाः - श्रियः, | श्रियोः | श्रीणाम्, श्रियाम् |
| स. | श्रियाम् - श्रियि | श्रियोः | श्रीषु |

एवं ह्री, धी, भी प्रभृतयः ॥

---

१५. ईकारान्तः स्त्रीलिङ्गः 'स्त्री' शब्दः (Woman)

| | | | |
|---|---|---|---|
| प्र. | स्त्री | स्त्रियौ | स्त्रियः |
| सं. प्र. | हे स्त्रि | हे स्त्रियौ | हे स्त्रियः |
| द्वि. | स्त्रियम्-स्त्रीम्, | स्त्रियौ | स्त्रियः, स्त्रीः |
| तृ. | स्त्रिया | स्त्रीभ्यां | स्त्रीभिः |
| च. | स्त्रियै | स्त्रीभ्यां | स्त्रीभ्यः |
| पं. | स्त्रियाः | स्त्रीभ्यां | स्त्रीभ्यः |
| ष. | स्त्रियाः | स्त्रियोः | स्त्रीणाम् |
| स. | स्त्रियां | स्त्रियोः | स्त्रीषु |

---

१६. उकारान्तः स्त्रीलिङ्गः 'धेनु' शब्दः (Cow)

| | | | |
|---|---|---|---|
| प्र. | धेनुः | धेनू | धेनवः |
| सं. प्र. | हे धेनो | हे धेनू | हे धेनवः |
| द्वि. | धेनुम् | धेनू | धेनूः |
| तृ. | धेन्वा | धेनुभ्यां | धेनुभिः |
| च. | * धेन्वै - धेनवे, | धेनुभ्यां | धेनुभ्यः |
| प. | धेन्वाः - धेनोः, | धेनुभ्यां | धेनुभ्यः |
| ष. | धेन्वाः - धेनोः, | धेन्वोः | धेनूनाम् |
| स. | धेन्वाम् - धेनौ | धेन्वोः | धेनुषु |

एवं तनु, इषु, रज्जु, चञ्चु प्रभृतयः ॥

१७. ऊकारान्तः स्त्रीलिङ्गः 'वधू' शब्दः (Bride)

| | | | |
|---|---|---|---|
| प्र. | वधूः | वध्वौ | वध्वः |
| सं. प्र. | हे वधु | हे वध्वौ | हे वध्वः |
| द्वि. | वधूम् | वध्वौ | वधूः |
| तृ. | वध्वा | वधूभ्यां | वधूभिः |
| च. | वध्वै | वधूभ्यां | वधूभ्यः |
| प. | वध्वाः | वधूभ्यां | वधूभ्यः |

* Note that the स्त्रीलिङ्ग words ending in उ i. e., धेनु, तनु, इषु, etc., also have two forms in the Singular of चतुर्थी, पञ्चमी, षष्ठी and सप्तमी like 'इ'कारान्त ॥

| | | | |
|---|---|---|---|
| ष. | वध्वाः | वध्वोः | वधूनाम् |
| स. | वध्वाम् | वध्वोः | वधूषु |

एवं चमू, श्वश्रू प्रभृतयः ॥

---

१८. ऊकारान्तः स्त्रीलिङ्गः 'भू' शब्दः (Earth)

| | | | |
|---|---|---|---|
| प्र. | भूः | भुवौ | भुवः |
| सं प्र. | हे भूः | हे भुवौ | हे भुवः |
| द्वि. | भुवम् | भुवौ | भुवः |
| तृ. | भुवा | भूभ्यां | भूभिः |
| च. | भुवै - भुवे, | भूभ्यां | भूभ्यः |
| प. | भुवाः - भुवः, | भूभ्यां | भूभ्यः |
| ष. | भुवाः - भुवः, | भुवोः | भूनाम्-भुवाम् |
| स. | भुवाम्- भुवि, | भुवोः | भूषु |

एवं भ्रू, सुभ्रू प्रभृतयः ॥

---

१९. ऋकारान्तः स्त्रीलिङ्गः 'स्वसृ' * शब्दः (Sister)

| | | | |
|---|---|---|---|
| प्र. | स्वसा | स्वसारौ | स्वसारः |
| सं. प्र. | हे स्वसः | हे स्वसारौ | हे स्वसारः |
| द्वि. | स्वसारम् | स्वसारौ | स्वसॄः |
| तृ. | स्वस्रा | स्वसृभ्यां | स्वसृभिः |

---

* The words स्वसृ, यातृ, दुहितृ and ननान्दृ being themselves feminine do not takethe feminine termination ई. See foot-notes on page 18.

| | | | |
|---|---|---|---|
| च. | स्वस्रे | स्वसृभ्यां | स्वसृभ्यः |
| प. | स्वसुः | स्वसृभ्यां | स्वसृभ्यः |
| ष. | स्वसुः | स्वस्रोः | स्वसृणाम् |
| स. | स्वसरि | स्वस्रोः | स्वसृषु |

२०. ऋकारान्तः स्त्रीलिङ्गः 'मातृ' शब्दः (Mother)

| | | | |
|---|---|---|---|
| प्र. | माता | मातरौ | मातरः |
| सं. प्र. | हे मातः | हे मातरौ | हे मातरः |
| द्वि. | मातरम् | मातरौ | मातॄः |
| तृ. | मात्रा | मातृभ्यां | मातृभिः |
| च. | मात्रे | मातृभ्यां | मातृभ्यः |
| प. | मातुः | मातृभ्यां | मातृभ्यः |
| ष. | मातुः | मात्रोः | मातॄणाम् |
| स. | मातरि | मात्रोः | मातृषु। |

एवं यातृ, दुहितृ, ननान्दृ प्रभृतयः ॥

२१. ऐकारान्तः स्त्रीलिङ्गः 'रै' शब्दः (Wealth)

पुंलिङ्गवत्

२२. ओकारान्तः स्त्रीलिङ्गः 'गो' शब्दः (Cow)

पुंलिङ्ग 'गो' शब्दवत्

एवं 'द्यो' शब्दः (Sky)

२३. औकारान्तः स्त्रीलिङ्गः 'नौ' शब्दः (Boat)

'ग्लौ' शब्दवत्

इति अजन्त स्त्रीलिङ्ग प्रकरणम्

# अजन्त नपुंसकलिङ्ग प्रकरणम्

—:o:—

२४. अकारान्तः नपुंसकलिङ्गः 'फल' शब्दः (Fruit)

| | | | |
|---|---|---|---|
| प्र. | फलम् | फले | फलानि |
| सं प्र. | हे फल | हे फले | हे फलानि |
| द्वि. | फलम् | फले | फलानि |

शेषम् अकारान्तपुंलिङ्ग 'राम' शब्दवत् ।

एवं ज्ञान, वन, घन, नेत्र प्रभृतयः ॥

---

२५. इकारान्तः नपुंसकलिङ्गः 'वारि' शब्दः (Water)

| | | | |
|---|---|---|---|
| प्र. | वारि | वारिणी | वारीणि |
| सं. प्र. | *हे वारे - हे वारि | हे वारिणी | हे वारीणि |
| द्वि. | वारि | वारिणी | वारीणि |
| तृ. | वारिणा | वारिभ्यां | वारिभिः |
| च. | वारिणे | वारिभ्यां | वारिभ्यः |
| प. | वारिणः | वारिभ्यां | वारिभ्यः |
| ष. | वारिणः | वारिणोः | वारीणाम् |
| स. | वारिणि | वारिणोः | वारिषु |

---

* The neuter words ending in इ, उ and ऋ have two forms in the संबोधन प्रथमा एकवचन ॥

२६. इकारान्तः नपुंसकलिङ्गः 'दधि' शब्दः (Curd)

| | | | |
|---|---|---|---|
| प्र. | दधि | दधिनी | दधीनि |
| सं प्र. | हे दधे - हे दधि, | हे दधिनी | हे दधीनि |
| द्वि. | दधि | दधिनी | दधीनि |
| तृ. | दध्ना | दधिभ्यां | दधिभिः |
| च. | दध्ने | दधिभ्यां | दधिभ्यः |
| प. | दध्नः | दधिभ्यां | दधिभ्यः |
| ष. | दध्नः | दध्नोः | दध्नाम् |
| स. | दध्नि - दधनि, | दध्नोः | दधिषु |

एवम् अस्थि, सक्थि, अक्षि शब्दाः

---

२७. इकारान्तः नपुंसकलिङ्गः 'शुचि' शब्दः (Pure)

| | | | |
|---|---|---|---|
| प्र. | शुचि | शुचिनी | शुचीनि |
| सं प्र. | हे शुचे - हे शुचि, | हे शुचिनी | हे शुचीनि |
| द्वि. | शुचि | शुचिनी | शुचीनि |
| तृ. | शुचिना | शुचिभ्यां | शुचिभिः |
| च. | *शुचिने - शुचये, | शुचिभ्यां | शुचिभ्यः |

---

* The adjectives (neuter) ending in इ, उ and ऋ have two forms in the Singular of चतुर्थी, पञ्चमी, षष्ठी and सप्तमी and षष्ठी, सप्तमी द्विवचन; one form being the masculine form of nouns ending in the respective letters (cf. हरये, गुरवे, कर्त्रे etc.)

| | | | |
|---|---|---|---|
| प. | शुचिनः - शुचेः, | शुचिभ्यां | शुचिभ्यः |
| ष. | शुचिनः - शुचेः, | शुचिनोः-शुच्योः, | शुचीनाम् |
| स. | शुचिनि- शुचौ, | शुचिनोः-शुच्योः, | शुचिषु |

एवम् अनादि, सुरभि प्रभृतयः

---

२८. उकारान्तः नपुंसकलिङ्गः 'मधु' शब्दः (Honey)

| | | | |
|---|---|---|---|
| प्र. | मधु | मधुनी | मधूनि |
| सं प्र. | हे मधो - हे मधु, | हे मधुनी | हे मधूनि |
| द्वि. | मधु | मधुनी | मधूनि |
| तृ. | मधुना | मधुभ्यां | मधुभिः |
| च. | मधुने | मधुभ्यां | मधुभ्यः |
| प. | मधुनः | मधुभ्यां | मधुभ्यः |
| ष. | मधुनः | मधुनोः | मधूनाम् |
| स. | मधुनि | मधुनोः | मधुषु |

एवम् अम्बु, अश्रु, वस्तु, दारु प्रभृतयः ।

---

२९. उकारन्तः नपुंसकलिङ्गः 'गुरु' शब्दः (Heavy)

| | | | |
|---|---|---|---|
| प्र. | गुरु | गुरुणी | गुरूणि |
| सं प्र. | हे गुरो - हे गुरु, | हे गुरुणी | हे गुरूणि |
| द्वि. | गुरु | गुरुणी | गुरूणि |
| तृ. | गुरुणा | गुरुभ्यां | गुरुभिः |

| | | | |
|---|---|---|---|
| च. | गुरुणे - गुरवे, | गुरुभ्यां | गुरुभ्यः |
| प. | गुरुणः, - गुरोः, | गुरुभ्यां | गुरुभ्यः |
| ष. | गुरुणः - गुरोः, | गुरुणोः - गुर्वोः, | गुरूणाम् |
| स. | गुरुणि - गुरौ, | गुरुणोः - गुर्वोः, | गुरुषु |

एवं मृदु, पृथु, पटु, लघु प्रभृतयः ।

---

३०. ऋकारान्तः नपुंसलिङ्गः 'दातृ' शब्दः

(That which gives)

| | | | |
|---|---|---|---|
| प्र. | दातृ | दातृणी | दातॄणी |
| सं प्र. | हे दातः - हे दातृ, | हे दातृणी | हे दातॄणी |
| द्वि. | दातृ | दातृणी | दातॄणी |
| तृ. | दातृणा - दात्रा, | दातृभ्यां | दातृभिः |
| च. | दातृणे - दात्रे, | दातृभ्यां | दातृभ्यः |
| प. | दातृणः- दातुः, | दातृभ्यां | दातृभ्यः |
| ष. | दातृणः- दातुः, | दातृणोः-दात्रोः, | दातॄणाम् |
| स. | दातृणि- दातरि, | दातृणोः-दात्रोः, | दातृषु |

एवं कर्तृ, गन्तृ, वक्तृ प्रभृतयः

---

नपुंसके एकारान्ताः, ऐकारान्ताः ओकारान्ताः,

औकारान्ताश्च शब्दाः न विद्यन्ते ॥

इति अजन्त नपुंसलिङ्गप्रकरणम्

**॥ इति अजन्तप्रकरणम् ॥**

## हलन्त पुंलिङ्ग प्रकरणम्

—:o:—

### ३१. चकारान्तः पुंलिङ्गः 'जलमुच्' *शब्दः (Cloud)

| | | | |
|---|---|---|---|
| प्र. | जलमुक् | जलमुचौ | जलमुचः |
| सं प्र. | हे जलमुक् | हे जलमुचौ | हे जलमुचः |
| द्वि. | जलमुचम् | जलमुचौ | जलमुचः |
| तृ. | जलमुचा | जलमुग्भ्यां | जलमुग्भिः |
| च. | जलमुचे | जलमुग्भ्यां | जलमुग्भ्यः |
| प. | जलमुचः | जलमुग्भ्यां | जलमुग्भ्यः |
| ष. | जलमुचः | जलमुचोः | जलमुचाम् |
| स. | जलमुचि | जलमुचोः | जलमुक्षु |

एवं पयोमुच्, सुवाच् प्रभृतयः.

---

### ३२. जकारान्तः पुंलिङ्गः 'वणिज्' *शब्दः (Merchant)

| | | | |
|---|---|---|---|
| प्र. | वणिक् | वणिजौ | वणिजः |
| सं. प्र. | हे वणिक् | हे वणिजौ | हे वणिजः |

---

*The final च् or ज् is changed to क् when followed by a hard consonant or by nothing and ग् when followed soft consonant.

| | | | |
|---|---|---|---|
| द्वि. | वणिजम् | वणिजौ | वणिजः |
| तृ. | वणिजा | वणिग्भ्यां | वणिग्भि |
| च. | वणिजे | वणिग्भ्यां | वणिग्भ्य |
| प. | वणिजः | वणिग्भ्यां | वणिग्भ्य |
| ष. | वणिजः | वणिजोः | वणिजाम् |
| स. | वणिजि | वणिजोः | वणिक्षु |

एवं भिषज्, हुतभुज् ऋत्विज् प्रभृतयः

---

३३. जकारान्तः पुंलिङ्गः 'राज्' शब्दः (King)

| | | | |
|---|---|---|---|
| प्र. | राट् | राजौ | राजः |
| सं. प्र. | हे राट् | हे राजौ | हे राजः |
| द्वि. | राजम् | राजौ | राजः |
| तृ. | राजा | राड्भ्यां | राड्भिः |
| च. | राजे | राड्भ्यां | राड्भ्यः |
| प. | राजः | राड्भ्यां | राड्भ्यः |
| ष. | राजः | राजोः | राजाम् |
| स. | राजि | राजोः | राट्सु |

एवं सम्राज्, परिव्राज्, विश्वसृज् प्रभृतयः

---

२४. तकारान्तः पुंलिङ्गः 'मरुत्' शब्दः (Wind)

| | | | |
|---|---|---|---|
| प्र. | मरुत् | मरुतौ | मरुतः |
| सं प्र. | हे मरुत् | हे मरुतौ | हे मरुतः |
| द्वि. | मरुतम् | मरुतौ | मरुतः |
| तृ. | मरुता | मरुद्भ्यां | मरुद्भिः |
| च. | मरुते | मरुद्भ्यां | मरुद्भ्यः |
| पं. | मरुतः | मरुद्भ्यां | मरुद्भ्यः |
| ष. | मरुतः | मरुतोः | मरुताम् |
| स. | मरुति | मरुतोः | मरुत्सु |

एवं भूभृत्, इन्द्रजित्, 'विश्वजित्, सोमसुत्, प्रभृतयः। [1]ददत्, दधत्, बिभ्यत्, प्रभृतयः; [2]जक्षत्, जाग्रत्, शासत्, चकासत्, दरिद्रत् प्रभृतयश्च एवमेव ॥

---

[1] The Present Participles of परस्मैपद roots of the 3rd conjugation ददत्, दधत्, बिभ्यत् etc.

And

[2] the present participles of the 2nd conjugation जक्षत्, जाग्रत्, etc. are declined like मरुत् ॥

All other Participles of the Present and the Future परस्मैपद in the masculine गच्छत्, गमिष्यत्, etc. are to be declined like पचत् शब्दः ॥ (Vide page 34.)

S—3

३५. तकारान्तः पुंलिङ्गः *' पचत् ' शब्दः (One who cooks)

| | | | |
|---|---|---|---|
| प्र. | पचन् | पचन्तौ | पचन्तः |
| सं प्र. | हे पचन् | हे पचन्तौ | हे पचन्तः |
| द्वि. | पचन्तम् | पचन्तौ | पचतः |

शेषं ' मरुत् ' शब्दवत्

एवं गच्छत्, गमिष्यत्, हरत्, हरिष्यत्, कुर्वत्, करिष्यत्, कथयत्, कथयिष्यत् प्रभृतयः ॥

---

३६. तकारान्तः पुंलिङ्गः * ' धीमत् ' शब्दः (Intelligent)

| | | | |
|---|---|---|---|
| प्र. | धीमान् | धीमन्तौ | धीमन्तः |
| सं प्र. | हे धीमन् | हे धीमन्तौ | हे धीमन्तः |
| द्वि. | धीमन्तम् | धीमन्तौ | धीमतः |

शेषं ' मरुत् ' शब्दवत्

एवं बुद्धिमत्, धनवत्, कृतवत्, भगवत्, यावत्, तावत्, कियत्, इयत् प्रभृतयः । ' मघवत् ' शब्दोऽप्येवमेव ॥

---

* पचन्, धीनान्, महान्, इत्येते त्रिविधा अपि तकारान्ताः स्त्रियाम् ईकारान्ता भवन्ति; i. e. पचन्ती, धीमती, महती इति। नदीशब्दवत् तेषां रूपाणि ॥

३७. तकारान्तः पुंलिङ्गः 'महत्' शब्दः (Great)

| | | | |
|---|---|---|---|
| प्र. | महान् | महान्तौ | महान्तः |
| सं प्र. | हे महन् | हे महान्तौ | हे महान्तः |
| द्वि. | महान्तम् | महान्तौ | महतः |

शेषं 'मरुत्' शब्दवत्

---

३८. दकारान्तः पुंलिङ्गः 'सुहृद्' शब्दः (Friend)

| | | | |
|---|---|---|---|
| प्र. | सुहृत् | सुहृदौ | सुहृदः |
| सं प्र. | हे सुहृत् | हे सुहृदौ | हे सुहृदः |
| द्वि. | सुहृदम् | सुहृदौ | सुहृदः |
| तृ. | सुहृदा | सुहृद्भ्यां | सुहृद्भिः |
| च. | सुहृदे | सुहृद्भ्यां | सुहृद्भ्यः |
| प. | सुहृदः | सुहृद्भ्यां | सुहृद्भ्यः |
| ष. | सुहृदः | सुहृदोः | सुहृदाम् |
| स. | सुहृदि | सुहृदोः | सुहृत्सु |

एवं दिविषद्, शास्त्रविद्, तमोनुद् प्रभृतयः

---

### ४२. नकारान्तः पुंलिङ्गः [1]'युवन्' शब्दः (Young man)

| | | | |
|---|---|---|---|
| प्र. | युवा | युवानौ | युवानः |
| सं प्र. | हे युवन् | हे युवानौ | हे युवानः |
| द्वि. | युवानम् | युवानौ | यूनः |
| तृ. | यूना | युवभ्यां | युवभिः |
| च. | यूने | युवभ्यां | युवभ्यः |
| प. | यूनः | युवभ्यां | युवभ्यः |
| ष. | यूनः | यूनोः | यूनाम् |
| स. | यूनि | यूनोः | युवसु |

---

### ४३. नकारान्तः पुंलिङ्गः 'मघवन्' शब्दः (इन्द्रः)

| | | | |
|---|---|---|---|
| प्र. | [2]मघवा | मघवानौ | मघवानः |
| सं. प्र. | हे मघवन् | हे मघवानौ | हे मघवानः |
| द्वि. | मघवानम् | मघवानौ | मघोनः |
| तृ. | मघोना | मघवभ्यां | मघवभिः |
| च. | मघोने | मघवभ्यां | मघवभ्यः |
| प. | मघोनः | मघवभ्यां | मघवभ्यः |

---

[1]युवन् शब्दस्य स्त्रियां 'युवतिः' इति मतिशब्दवत् रूपम्। 'युवती' इत्यप्यस्ति ॥

[2]Note the difference between 'मघवत्' शब्द given under the 36th शब्द. (Page 34) and मघवन् शब्दः।

| | | | |
|---|---|---|---|
| ष. | मघोनः | मघोनोः | मघोनाम् |
| स. | मघोनि | मघोनोः | मघवसु |

---

४४. नकारान्तः पुंलिङ्गः 'पथिन्' शब्दः (Road)

| | | | |
|---|---|---|---|
| प्र. | पन्थाः | पन्थानौ | पन्थानः |
| सं प्र. | हे पन्थाः | हे पन्थानौ | हे पन्थानः |
| द्वि. | पन्थानम् | पन्थानौ | पथः |
| तृ. | पथा | पथिभ्यां | पथिभिः |
| च. | पथे | पथिभ्यां | पथिभ्यः |
| प. | पथः | पथिभ्यां | पथिभ्यः |
| ष. | पथः | पथोः | पथाम् |
| स. | पथि | पथोः | पथिषु |

एवं मथिन् शब्दः

---

४५. नकारान्तः पुंलिङ्गः *'करिन्' शब्दः (Elephant)

| | | | |
|---|---|---|---|
| प्र. | करी | करिणौ | करिणः |
| सं प्र. | हे करिन् | हे करिणौ | हे करिणः |

---

*एतद्वर्गीयाः शब्दाः स्त्रियाम् ईकारान्ता भवन्ति—करिणी, गुणिनी इति ॥

| | | | |
|---|---|---|---|
| द्वि. | करिणम् | करिणौ | करिणः |
| तृ. | करिणा | करिभ्यां | करिभिः |
| च. | करिणे | करिभ्यां | करिभ्यः |
| प. | करिणः | करिभ्यां | करिभ्यः |
| ष. | करिणः | करिणोः | करिणाम् |
| स. | करिणि | करिणोः | करिषु |

एवं गुणिन्, धनिन्, शशिन्, प्रभृतयः

---

४६. शकारान्तः पुंलिङ्गः 'विश्' शब्दः (People)

| | | | |
|---|---|---|---|
| प्र. | *विट् | विशौ | विशः |
| सं प्र. | हे विट् | हे विशौ | हे विशः |
| द्वि. | विशम् | विशौ | विशः |
| तृ. | विशा | विड्भ्यां | विड्भिः |
| च. | विशे | विड्भ्यां | विड्भ्यः |
| प. | विशः | विड्भ्यां | विड्भ्यः |
| ष. | विशः | विशोः | विशाम् |
| स. | विशि | विशोः | विट्सु |

---

*The ending श् of root-nouns is changed to ट् or ड्, विट् or विड् etc. But the श् or दिश्, दृश् and स्पृश् is changed to क् or ग् i.e., दिक् or दिग्; दृक् or दृग्; स्पृक् or स्पृग्॥

४७. शकारान्तः पुंलिङ्गः 'तादृश्' शब्दः (Such like)

| | | | |
|---|---|---|---|
| प्र. | *तादृक् | तादृशौ | तादृशः |
| सं प्र. | हे तादृक् | हे तादृशौ | हे तादृशः |
| द्वि. | तादृशम् | तादृशौ | तादृशः |
| तृ. | तादृशा | तादृग्भ्यां | तादृग्भिः |
| च. | तादृशे | तादृग्भ्यां | तादृग्भ्यः |
| प. | तादृशः | तादृग्भ्यां | तादृग्भ्यः |
| ष. | तादृशः | तादृशोः | तादृशाम् |
| स. | तादृशि | तादृशोः | तादृक्षु |

एवम् ईदृश्, मादृश्, त्वादृश्, अस्मादृश्, युष्मादृश्, भवादृश्, तत्वदृश् प्रभृतयः ॥

---

४८. षकारान्तः पुंलिङ्गः 'द्विष्' शब्दः (Enemy)

| | | | |
|---|---|---|---|
| प्र. | द्विट् | द्विषौ | द्विषः |
| सं प्र. | हे द्विट् | हे द्विषौ | हे द्विषः |
| द्वि. | द्विषम् | द्विषौ | द्विषः |
| तृ. | द्विषा | द्विड्भ्यां | द्विड्भिः |
| च. | द्विषे | द्विड्भ्यां | द्विड्भ्यः |

---

* एतेषां स्त्रियां 'तादृशी, ईदृशी' इत्यादीनि रूपाणि। एते शब्दाः पुंलिङ्गे 'तादृशः' इत्येवम् अकारान्ताः अपि प्रयुज्यन्ते। तेषां तु स्त्रियां 'तादृशा, ईदृशा' इत्येवं रमाशब्दवत् रूपाणि ॥

| | | | |
|---|---|---|---|
| प. | द्विषः | द्विड्भ्यां | द्विड्भ्यः |
| ष. | द्विषः | द्विषोः | द्विषाम् |
| स. | द्विषि | द्विषोः | द्विट्सु |

एवं रत्नसुष् , सितत्विष् प्रभृतयः

---

४९. सकारान्तः पुंलिङ्गः 'वेधस्' शब्दः (ब्रह्मा)

| | | | |
|---|---|---|---|
| प्र. | वेधाः | वेधसौ | वेधसः |
| सं प्र. | हे वेधः | हे वेधसौ | हे वेधसः |
| द्वि. | वेधसम् | वेधसौ | वेधसः |
| तृ. | वेधसा | वेधोभ्यां | वेधोभिः |
| च. | वेधसे | वेधोभ्यां | वेधोभ्यः |
| प. | वेधसः | वेधोभ्यां | वेधोभ्यः |
| ष. | वेधसः | वेधसोः | वेधसाम् |
| स. | वेधसि | वेधसोः | वेधस्सु |

एवं चद्रमस् , सुमनस् , पुरोधस् प्रभृतयः

---

५०. सकारान्तः पुंलिङ्गः 'श्रेयस्' शब्दः (Superior)

| | | | |
|---|---|---|---|
| प्र. | श्रेयान्* | श्रेयांसौ | श्रेयांसः |
| सं प्र. | हे श्रेयन् | हे श्रेयांसौ | हे श्रेयांसः |

---

* एतद्वर्गीयाः शब्दाः स्त्रियां 'श्रेयसी' इत्येवम् ईकारान्ताः भवन्ति तेषां नदी शब्दवत् रूपम् ॥

| | | | |
|---|---|---|---|
| द्वि. | श्रेयांसम् | श्रेयांसौ | श्रेयसः |
| तृ. | श्रेयसा | श्रेयोभ्यां | श्रेयोभिः |
| च. | श्रेयसे | श्रेयोभ्यां | श्रेयोभ्यः |
| प. | श्रेयसः | श्रेयोभ्यां | श्रेयोभ्यः |
| ष. | श्रेयसः | श्रेयसोः | श्रेयसाम् |
| स. | श्रेयसि | श्रेयसोः | श्रेयस्सु |

एवं गरीयस्, स्थवीयस् प्रभृतयः

---

५१- सकारान्तः पुंलिङ्गः 'विद्वस्' शब्दः (Scholar)

| | | | |
|---|---|---|---|
| प्र. | *विद्वान् | विद्वांसौ | विद्वांसः |
| सं प्र. | हे विद्वन् | हे विद्वांसौ | हे विद्वांसः |
| द्वि. | विद्वांसं | विद्वांसौ | विदुषः |
| तृ. | विदुषा | विद्वद्भ्यां | विद्वद्भिः |
| च. | विदुषे | विद्वद्भ्यां | विद्वद्भ्यः |
| प. | विदुषः | विद्वद्भ्यां | विद्वद्भ्यः |
| ष. | विदुषः | विदुषोः | विदुषाम् |
| स. | विदुषि | विदुषोः | विद्वत्सु |

एव ऊचिवस्, उपेयिवस्, सेदिवस्, तस्थिवस् प्रभृतयः

---

* एतद्वर्गीया अपि स्त्रियाम् ईकारान्ता भवन्ति। यथा—विदुषी, ऊचुषी, उपेयुषी, सेदुषी, तस्थुषी, इत्यादि ॥

५२. सकारान्तः पुंलिङ्गः 'पुंस्' शब्दः (Man)

| | | | |
|---|---|---|---|
| प्र. | पुमान् | पुमांसौ | पुमांसः |
| सं. प्र | हे पुमन् | हे पुमांसौ | हे पुमांसः |
| द्वि. | पुमांसम् | पुमांसौ | पुंसः |
| तृ. | पुंसा | पुंभ्यां | पुंभिः |
| च. | पुंसे | पुंभ्यां | पुंभ्यः |
| प. | पुंसः | पुंभ्यां | पुंभ्यः |
| ष. | पुंसः | पुंसोः | पुंसाम् |
| स. | पुंसि | पुंसोः | पुंसु |

५३. सकारान्तः पुंलिङ्गः 'दोस्' शब्दः (Arm)

| | | | |
|---|---|---|---|
| प्र. | दोः | दोषौ | दोषः |
| सं. प्र. | हे दोः | हे दोषौ | हे दोषः |
| द्वि. | दोषम् | दोषौ | दोषः |
| तृ. | दोषा | दोर्भ्यां | दोर्भिः |
| च. | दोषे | दोर्भ्यां | दोर्भ्यः |
| प. | दोषः | दोर्भ्यां | दोर्भ्यः |
| ष. | दोषः | दोषोः | दोषाम् |
| स. | दोषि | दोषोः | दोष्षु |

५४. हकारान्तः पुंलिङ्गः ' लिह् ' शब्दः (One who licks)

| | | | |
|---|---|---|---|
| प्र. | लिट् | लिहौ | लिहः |
| सं प्र. | हे लिट् | हे लिहौ | हे लिहः |
| द्वि. | लिहम् | लिहौ | लिहः |
| तृ. | लिहा | लिड्भ्यां | लिड्भिः |
| च. | लिहे | लिड्भ्यां | लिड्भ्यः |
| प. | लिहः | लिड्भ्यां | लिड्भ्यः |
| ष. | लिहः | लिहोः | लिहाम् |
| स. | लिहि | लिहोः | लिट्सु |

एवं भूरुह् ' महीरुह् प्रभृतयः

॥ इति हलन्त पुंलिङ्ग प्रकरणम् ॥

---

## अथ हलन्त स्त्रीलिङ्ग प्रकरणम्

हलन्तेषु केचन शब्दाः स्त्रियाम् ईकारान्ता भवन्ति। तेषां नदीशब्दवत् रूपाणि। ये शब्दा ईकारान्ता न भवन्ति ते तत्तदन्ताः पुंलिङ्गशब्दा इव द्रष्टव्याः। तथा हि—

५५. चकारान्तः स्त्रीलिङ्गः ' वाच् ' शब्दः (Speech)

पुंलिङ्ग ' जलमुच् ' (Page 31) शब्दवत्

एवं त्वच्, रुच् प्रभृतयः

---

५६. जकारान्तः स्त्रीलिङ्गः ‘स्रज्’ शब्दः (Garland)

पुंलिङ्ग ‘वणिज्’ (Page 31) शब्दवत्

---

५७, तकारान्तः स्त्रीलिङ्गः ‘सरित्’ शब्दः (River)

पुंलिङ्ग ‘मरुत्’ (Page 33) शब्दवत्

एवं हरित्, तटित् प्रभृतयः

---

५८. दकारान्तः स्त्रीलिङ्गः ‘शरत्’ शब्दः (Autumn season)

पुंलिङ्ग ‘सुहृद्’ (Page 35) शब्दवत्

एवं सम्पद्, आपद्, मृद् प्रभृतयः ॥

---

५९. धकारान्तः स्त्रीलिङ्गः ‘क्षुध्’ शब्दः (Hunger)

| | | | |
|---|---|---|---|
| प्र. | क्षुत् | क्षुधौ | क्षुधः |
| सं प्र. | हे क्षुत् | हे क्षुधौ | हे क्षुधः |
| द्वि. | क्षुधम् | क्षुधौ | क्षुधः |
| तृ. | क्षुधा | क्षुद्भ्यां | क्षुद्भिः |
| च. | क्षुधे | क्षुद्भ्यां | क्षुद्भ्यः |
| प. | क्षुधः | क्षुद्भ्यां | क्षुद्भ्यः |
| ष. | क्षुधः | क्षुधोः | क्षुधाम् |
| स. | क्षुधि | क्षुधोः | क्षुत्सु |

एवं युध्, समिध्, वीरुध् प्रभृतयः। पुंलिङ्गेऽपि भवन्त ‘मर्माविध्’ प्रभृतयोऽप्येवमेव ज्ञेयाः ॥

---

६०. नकारान्तः स्त्रीलिङ्गः *'सीमन्' शब्दः (Boundary)

पुलिङ्ग 'राजन्' (Page 36) शब्दवत्

एवं दामन् प्रभृतयः

---

६१ पकारान्तः स्त्रीलिङ्गः 'अप्' शब्दः (Water)

(नित्यं बहुवचनान्तः Always Plural)

आपः, हे आपः, अपः, अद्भिः, अद्भ्यः, अद्भ्यः अपाम्, अप्सु ॥

---

६२. मकारान्तः स्त्रीलिङ्गः 'ककुभ्' शब्दः (Direction)

| | | | |
|---|---|---|---|
| प्र. | ककुप् | ककुभौ | ककुभः |
| सं. प्र' | हे ककुप् | हे ककुभौ | हे ककुभः |
| द्वि. | ककुभम् | ककुभौ | ककुभः |
| तृ. | ककुभा | ककुब्भ्यां | ककुब्भिः |
| च. | ककुभे | ककुब्भ्यां | ककुब्भ्यः |
| प. | ककुभः | ककुब्भ्यां | ककुब्भ्यः |
| ष. | ककुभः | ककुभोः | ककुभाम् |
| स. | ककुभि | ककुभोः | ककुप्सु |

---

*The words सीमन्, दामन् etc. formed by the addition of मन् do not take the feminine termination ई though they end in न्. These words are however optionally declined like feminine words ending in आ ;

i,e., सीमा, सीमे, सीमाः, etc.

६३. रेफान्तः स्त्रीलिङ्गः 'गिर्' शब्दः (Speech)

| | | | |
|---|---|---|---|
| प्र. | गीः | गिरौ | गिरः |
| सं प्र. | हे गीः | हे गिरौ | हे गिरः |
| द्वि. | गिरम् | गिरौ | गिरः |
| तृ. | गिरा | गीर्भ्यां | गीर्भिः |
| च. | गिरे | गीर्भ्यां | गीर्भ्यः |
| प. | गिरः | गीर्भ्यां | गीर्भ्यः |
| ष. | गिरः | गिरोः | गिराम् |
| स. | गिरि | गिरोः | गीर्षु |

एवं धुर्, पुर् प्रभृतयः

६४. वकारान्तः स्त्रीलिङ्गः 'दिव्' शब्दः (Heaven)

| | | | |
|---|---|---|---|
| प्र. | *द्यौः | दिवौ | दिवः |
| सं प्र. | हे द्यौः | हे दिवौ | हे दिवः |
| द्वि. | दिवम् | दिवौ | दिवः |
| तृ. | दिवा | द्युभ्यां | द्युभिः |
| च. | दिवे | द्युभ्यां | द्युभ्यः |
| प. | दिवः | द्युभ्यां | द्युभ्यः |
| ष. | दिवः | दिवोः | दिवाम् |
| स. | दिवि | दिवोः | द्युषु |

*Note the other mode of declension—22nd शब्दः

६५. शकारान्तः स्त्रीलिङ्गः* 'निश्' शब्दः (Night)
पुंलिङ्ग 'विश्' (Page 40) शब्दवत्
एवं विपाश् प्रभृतयः

---

६६. शकारान्तः स्त्रीलिङ्गः 'दिश्' शब्दः (Direction)
पुंलिङ्ग 'तादृश्' (Page 41) शब्दवत्

---

६७. षकारान्तः स्त्रीलिङ्गः 'प्रावृष् शब्दः (Rainy Season)
पुंलिङ्ग 'द्विष्' (Page 41) शब्दवत्
एवं त्विष् प्रभृतयः

---

६८. सकारान्तः स्त्रीलिङ्गः 'भास्' शब्दः (Light)

| | | | |
|---|---|---|---|
| प्र. | भाः | भासौ | भासः |
| सं प्र. | हे भाः | हे भासौ | हे भासः |
| द्वि. | भासम् | भासौ | भासः |
| तृ. | भासा | भाभ्यां | भाभिः |
| च. | भासे | भाभ्यां | भाभ्यः |
| प. | भासः | भाभ्यां | भाभ्यः |
| ष. | भासः | भासोः | भासाम् |
| स. | भासि | भासोः | भास्सु |

---

* अस्मिन् अर्थे 'निशा' शब्दोऽपि वर्तते । रमाशब्दवत् रूपम् ॥

६९. सकारान्तः स्त्रीलिङ्गः 'आशिस्' शब्दः (Blessing)

| | | | |
|---|---|---|---|
| प्र. | आशीः | आशिषौ | आशिषः |
| सं प्र. | हे आशीः | हे आशिषौ | हे आशिषः |
| द्वि. | आशिषम् | आशिषौ | आशिषः |
| तृ. | आशिषा | आशीर्भ्यां | आशीर्भिः |
| च. | आशिषे | आशीर्भ्यां | आशीर्भ्यः |
| प. | आशिषः | आशीर्भ्यां | आशीर्भ्यः |
| ष. | आशिषः | आशिषोः | आशिषाम् |
| स. | आशिषि | आशिषोः | आशीःषु |

---

७०. हकारान्तः स्त्रीलिङ्गः 'उपानह्' शब्दः (Shoe)

| | | | |
|---|---|---|---|
| प्र. | उपानत् | उपानहौ | उपानहः |
| सं प्र. | हे उपानत् | हे उपानहौ | हे उपानहः |
| द्वि. | उपानहम् | उपानहौ | उपानहः |
| तृ. | उपानहा | उपानद्भ्यां | उपानद्भिः |
| च. | उपानहे | उपानद्भ्यां | उपानद्भ्यः |
| प. | उपानहः | उपानद्भ्यां | उपानद्भ्यः |
| ष. | उपानहः | उपानहोः | उपानहाम् |
| सं. | उपानहि | उपानहोः | उपानत्सु |

॥ इति हलन्त स्त्रीलिङ्ग प्रकरणम् ॥

---

## अथ हलन्त नपुंसकलिङ्ग प्रकरणम्

७१. चकारान्तः नपुंसकलिङ्गः 'सुवाच्' शब्दः (Eloquent)

| | | | |
|---|---|---|---|
| प्र. | सुवाक् | सुवाची | सुवाञ्चि |
| सं. प्र. | हे सुवाक् | हे सुवाची | हे सुवाञ्चि |
| द्वि. | सुवाक् | सुवाची | सुवाञ्चि |

शेषं 'जलमुच्' शब्दवत्

---

७२. जकारान्तः नपुंसकलिङ्गः 'असृज्' शब्दः (Blood)

| | | | |
|---|---|---|---|
| प्र. | असृक् | असृजी | असृञ्जि |
| सं. प्र. | हे असृक् | हे असृजी | हे असृञ्जि |
| द्वि. | असृक् | असृजी | असृञ्जि |

शेषं 'वणिज्' शब्दवत्

---

७३. तकारान्तः नपुंसकलिङ्गः 'जगत्' *शब्दः (World)

| | | | |
|---|---|---|---|
| प्र. | जगत् | जगती | जगन्ति |
| सं. प्र. | हे जगत् | हे जगती | हे जगन्ति |
| द्वि. | जगत् | जगती | जगन्ति |

शेषं 'मरुत्' शब्दवत्

---

एवं भास्वत्, गतवत्, सुन्वत्, तन्वत्, रुन्धत्, क्रीणत्, अदत्, बृहत्, पृषत्, प्रभृतयः ॥

---

* मत्वन्ताः, वत्वन्ताः, स्वादि-तनादि-रुधादि-क्रयादि धातुभ्यो निष्पन्नाः शत्रन्ताः, (i. e. of 5th, 7th, 8th and 9th conjugations;) अदादौ अकारान्तवर्जितधातुभ्यो निष्पन्नाः शत्रन्ताः, बृहत्, पृषत् प्रभृतयः शब्दाश्च एवं ज्ञेयाः ॥

७४. तकारान्तः नपुंसकलिङ्गः 'ददत्' शब्दः (Giving)

| | | | |
|---|---|---|---|
| प्र. | ददत् | ददती | ददति- ददन्ति |
| सं. प्र. | हे ददत् | हे ददती | हे ददति-हे ददन्ति |
| द्वि. | ददत् | ददती | ददति- ददन्ति |

शेषं 'मरुत्' शब्दवत्

[1]एवं जुह्वत्, शंसत्, जक्षत्, चकासत्, दरिद्रत्, जाग्रत्, प्रभृतयः ॥

---

७५. तकारान्तः नपुंसकलिङ्गः 'तुदत्' शब्दः (Giving Pain)

| | | | |
|---|---|---|---|
| प्र. | तुदत् | तुदन्ती- तुदती, | तुदन्ति |
| सं. प्र. | हे तुदत् | हे तुदन्ती- हे तुदती, | हे तुदन्ति |
| द्वि. | तुदत् | तुदन्ती- तुदती, | तुदन्ति |

शेषं 'मरुत्' शब्दवत्

[2]एवं पृच्छत्, मुञ्चत्, यात्, भात्, करिष्यत, प्रभृतयः ॥

---

७६. तकारान्तः नपुंसकलिङ्गः 'पचत्' शब्दः (Cooking)

| | | | |
|---|---|---|---|
| प्र. | पचत् | पचन्ती | पचन्ति |
| सं. प्र. | हे पचत् | हे पचन्ती | हे पचन्ति |
| द्वि. | पचत् | पचन्ती | पचन्ति |

शेषं 'मरुत्' शब्दवत्

---

[1] अभ्यस्तधातुभ्यः (जुहोत्यादिभ्यः यङ्लुगन्तेभ्यश्च) निष्पन्नाः शत्रन्ताः 'शासत्' प्रभृतयश्च एवं द्रष्टव्याः ॥

[2] तुदादिभ्यः अदादौ अकारान्तेभ्यश्च धातुभ्यो निष्पन्नाः शत्रन्ताः (Present Participles) लृटो निष्पन्ना शत्रन्ताश्च (Future participles) अस्मिन् वर्गेऽन्तर्भवन्ति ॥

[1]एवं भवत्, दीव्यत्, चोरयत्, चिकीर्षत्, पुत्रीयत् प्रभृतयः ॥

---

७७. तकारान्तः नपुंसकलिङ्गः 'महत्' शब्दः (Great)

| | | | |
|---|---|---|---|
| प्र. | महत् | महती | महान्ति |
| सं. प्र. | हे महत् | हे महती | हे महान्ति |
| द्वि. | महत् | महती | महान्ति |

शेषं पुंवत्

---

७८. दकारान्तः नपुंसकलिङ्गः 'हृद्' शब्दः (Heart)

| | | | |
|---|---|---|---|
| प्र. | हृत् | हृदी | हृन्दि |
| सं. प्र. | हे हृत् | हे हृदी | हे हृन्दि |
| द्वि. | हृत् | हृदी | हृन्दि |

शेष 'सुहृद्' शब्दवत्

---

७९. नकारान्तः नपुंसकलिङ्गः 'नामन्' शब्दः (Name)

| | | | |
|---|---|---|---|
| प्र. | नाम | नाम्नी—नामनी, | नामानि |
| सं.प्र. | हे नामन्—हे नाम, | हे नाम्नी—हे नामनी, | हे नामानि |
| द्वि. | नाम | नाम्नी— नामनी, | नामानि |

शेषं 'राजन्' शब्दवत्

एवं धामन्, व्योमन्, हेमन् प्रभृतयः ॥

---

[1]भ्वादि-दिवादि-चुरादि-सन्नन्त-नामधातुभ्यो निष्पन्नाः शत्रन्ताः एवंविधाः ॥

८०. नकारान्तः नपुंसकलिङ्गः 'कर्मन्' शब्दः (Action)

| | | | |
|---|---|---|---|
| प्र. | कर्म | कर्मणी | कर्माणि |
| सं. प्र. | हे कर्मन्–हे कर्म, | हे कर्मणी | हे कर्माणि |
| द्वि. | कर्म | कर्मणी | कर्माणि |

शेषं 'आत्मन्' शब्दवत्

एवं शर्मन्, वर्मन्, वेश्मन्, सद्मन् प्रभृतयः

---

८१. नकारान्तः नपुंसकलिङ्गः 'अहन्' शब्दः (Day)

| | | | |
|---|---|---|---|
| प्र. | अहः | अह्नी– अहनी, | अहानि |
| सं.प्र. | हे अहः | हे अह्नी– हे अहनी, | हे अहानि |
| द्वि. | अहः | अह्नी– अहनी, | अहानि |
| तृ. | अह्ना | अहोभ्यां | अहोभिः |
| च. | अह्ने | अहोभ्यां | अहोभ्यः |
| प. | अह्नः | अहोभ्यां | अहोभ्यः |
| ष. | अह्नः | अह्नोः | अह्नाम् |
| स. | अह्नि-अहनि, | अह्नोः | अहस्सु |

---

८२. नकारान्तः नपुंसकलिङ्गः 'गुणिन्' शब्दः (Meritorious)

| | | | |
|---|---|---|---|
| प्र. | गुणि | गुणिनी | गुणीनि |
| सं. प्र. | हे गुणिन्, हे गुणि | हे गुणिनी | हे गुणीनि |
| द्वि. | गुणि | गुणिनी | गुणीनि |

शेषं 'करिन्' शब्दवत्

एवं कुशलिन्, वाग्मिन्, दण्डिन् प्रभृतयः

---

८३. रेफान्तः नपुंसकलिङ्गः 'वार्' शब्दः (Water)

| | | | |
|---|---|---|---|
| प्र. | वाः | वारी | वारि |
| सं. प्र. | हे वाः | हे वारी | हे वारि |
| द्वि. | वाः | वारी | वारि |

शेषं 'गिर्' शब्दवत्

---

८४. शकारान्तः नपुंसकलिङ्गः 'तादृश्' शब्दः (Of that kind)

| | | | |
|---|---|---|---|
| प्र. | तादृक् | तादृशी | तादृंशि |
| सं. प्र. | हे तादृक् | हे तादृशी | हे तादृंशि |
| द्वि. | तादृक् | तादृशी | तादृंशि |

शेषं पुंवत्

एवम् एतादृश्, ईदृश्, कीदृश्, प्रभृतयः

---

८५. षकारान्तः नपुंसकलिङ्गः 'सुत्विष्' शब्दः (Very lustrous)

| | | | |
|---|---|---|---|
| प्र. | सुत्विट् | सुत्विषी | सुत्वींषि |
| सं. प्र. | हे सुत्विट् | हे सुत्विषी | हे सुत्वींषि |
| द्वि. | सुत्विट् | सुत्विषी | सुत्वींषि |

शेषं 'त्विष्' शब्दवत्। एवं रत्नमुष् प्रभृतयः

---

८६. सकारान्तः नपुंसकलिङ्गः 'मनस्' शब्दः (Mind)

| | | | |
|---|---|---|---|
| प्र. | मनः | मनसी | मनांसि |
| सं. प्र. | हे मनः | हे मनसी | हे मनांसि |
| द्वि. | मनः | मनसी | मनांसि |

शेषं 'वेधस्' शब्दवत्। एवं तपस्, यशस्, प्रभृतयः गरीयस्, श्रेयस्, प्रभृतयः ईयसन्ता अपि क्लीबे एवमेव ॥

---

८७. सकारान्तः नपुंसकलिङ्गः 'हविस्' शब्दः (Oblation)

| | | | |
|---|---|---|---|
| प्र. | हविः | हविषी | हवींषि |
| सं. प्र. | हे हविः | हे हविषी | हे हवींषि |
| द्वि. | हविः | हविषी | हवींषि |
| तृ. | हविषा | हविर्भ्यां | हविर्भिः |
| च. | हविषे | हविर्भ्यां | हविर्भ्यः |
| प. | हविषः | हविर्भ्यां | हविर्भ्यः |
| ष. | हविषः | हविषोः | हविषाम् |
| स. | हविषि | हविषोः | हविष्षु |

एवं सर्पिस्, ज्योतिस्, रोचिस्, प्रभृतयः

---

८८. सकारान्तः नपुंसकलिङ्गः 'वपुस्' शब्दः (Body)

| | | | |
|---|---|---|---|
| प्र. | वपुः | वपुषी | वपूंषि |
| सं. प्र. | हे वपुः | हे वपुषी | हे वपूंषि |
| द्वि. | वपुः | वपुषी | वपूंषि |

| | | | |
|---|---|---|---|
| तृ. | वपुषा | वपुर्भ्यां | वपुर्भिः |
| च. | वपुषे | वपुर्भ्यां | वपुर्भ्यः |
| प. | वपुषः | वपुर्भ्यां | वपुर्भ्यः |
| ष. | वपुषः | वपुषोः | वपुषाम् |
| स. | वपुषि | वपुषोः | वपुष्षु |

एवं आयुस्, चक्षुस्, धनुस्, प्रभृतयः

८९. सकारान्तः नपुंसकलिङ्गः तस्थिवस्' शब्दः
(That which has stood)

| | | | |
|---|---|---|---|
| प्र. | तस्थिवत् | तस्थुषी | तस्थिवांसि |
| सं. प्र. | हे तस्थिवत् | हे तस्थुषी | हे तस्थिवांसि |
| द्वि. | तस्थिवत् | तस्थुषी | तस्थिवांसि |

शेषं 'विद्वस्' शब्दवत्। एवं ऊचिवस्, उपेयिवस्, प्रभृतयः॥

९०. हकारान्तः नपुंसकलिङ्गः 'अम्भोरुह् (Lotus) शब्दः

| | | | |
|---|---|---|---|
| प्र. | अम्भोरुट् | अम्भोरुही | अम्भोरुंहि |
| सं. प्र. | हे अम्भोरुट् | हे अम्भोरुही | हे अम्भोरुंहि |
| द्वि. | अम्भोरुट् | अम्भोरुही | अम्भोरुंहि |

शेषं 'लिह्' शब्दवत्

॥ इति हलन्त नपुंसकलिङ्ग प्रकरणम् ॥

॥ इति हलन्त प्रकरणम् ॥

॥ इति साधारणशब्द विभागः ॥

# अथ सर्वनामशब्द प्रकरणम् (Pronouns)

There are 35 Pronouns which are classified under the following 6 kinds :—

1. Personal—[1]अस्मद् (I), युष्मद् (You), भवत् (Your Honour), स्व (One's own)
2. Relative—यद् (who), डतर, डतम—२ प्रत्ययाऽ.
3. Interrogative—किम् (who)
4. Demonstrative—सर्व (All), विश्व (All), अन्य (another), अन्यतर (either of two), इतर (Other), त्वत् (Other), त्व (Other), नेम (Half), [3]सम (All), सिम (All), तद् (That) एतद् (This), अदस् (That), त्यद् (That), [4]इदम् (This)

---

1. There is no vocative case for Personal Pronouns.

2. There is another word अन्यतम which is not a Pronoun. It is declined like रामशब्द.

3. सम when it meanss 'All' is a Pronoun. But सम when it means 'Equal' is not a Pronoun and is declined like रामशब्द.

4. इदम्-अदस् एतद्-तद्-इति चतुर्णां शब्दानाम् अर्थभेदः—

*इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥

इदम् is used when a person or thing is near at hand,

5. Numeral—[1]एक (one), द्वि (Two), उभ (Both), उभय (Both).

6. Directional—पूर्व (Eastern), पर (Other), अवर (Western), दक्षिण (Southern), उत्तर (Northern), अपर (Other), अधर (Inferior), अन्तर (Outer)

डतर and डतम are २ प्रत्ययाS which can be affixed to किम्, यद् and तद्. Ex. कतर (who or which of two), कतम (who, or which of many) यतर (who or which of two) यतम (who or which of many) ततर (That one of two) ततम (That one of many)

---

एतद् is used when a person or thing is nearer still.

अदस् is used when a person or thing is at a distance.

तद् is used when a person or thing is absent.

एक, द्वि–शब्दौ सङ्ख्या शब्दप्रकरणे द्रष्टव्यौ।

एकोऽल्पार्थे प्रधाने च प्रथमे केवले तथा।
साधारणे समानेऽपि सङ्ख्यायां च प्रयुज्यते॥

1. The various meanings of एक are:—

एक one, अल्प little, प्रधान chief-eminent, प्रथम foremost, केवल sole-only, साधारण common, समान same, संख्या The number one.

## ९१. अकारान्तः पुंलिङ्गः 'सर्व' शब्दः (All)

| | | | |
|---|---|---|---|
| प्र. | सर्वः | सर्वौ | सर्वे |
| सं. प्र. | हे सर्व | हे सर्वौ | हे सर्वे |
| द्वि. | सर्वम् | सर्वौ | सर्वान् |
| तृ. | सर्वेण | सर्वाभ्यां | सर्वैः |
| च. | सर्वस्मै | सर्वाभ्यां | सर्वेभ्यः |
| प. | सर्वस्मात् | सर्वाभ्यां | सर्वेभ्यः |
| ष. | सर्वस्य | सर्वयोः | सर्वेषाम् |
| स. | सर्वस्मिन् | सर्वयोः | सर्वेषु |

एवं विश्व, डतर-डतमप्रत्ययान्त, एकतर, एकतम, अन्य, अन्यतर, इतर, त्व, नेम, सम शब्दाः

---

## ९२. आकारान्तः स्त्रीलिङ्गः 'सर्वा' शब्दः (All)

| | | | |
|---|---|---|---|
| प्र. | सर्वा | सर्वे | सर्वाः |
| सं. प्र. | हे सर्वे | हे सर्वे | हे सर्वाः |
| द्वि. | सर्वाम् | सर्वे | सर्वाः |
| तृ. | सर्वया | सर्वाभ्यां | सर्वाभिः |
| च. | सर्वस्यै | सर्वाभ्यां | सर्वाभ्यः |
| प. | सर्वस्याः | सर्वाभ्यां | सर्वाभ्यः |
| ष. | सर्वस्याः | सर्वयोः | सर्वासाम् |
| स. | सर्वस्यां | सर्वयोः | सर्वासु |

एवं स्त्रीलिङ्ग 'विश्वा' प्रभृतयः

९३. अकारान्तः नपुंसकलिङ्गः 'सर्व' शब्दः (All)

| | | | |
|---|---|---|---|
| प्र. | सर्वम् | सर्वे | सर्वाणि |
| सं. प्र. | हे सर्व | हे सर्वे | हे सर्वाणि |
| द्वि. | सर्वम् | सर्वे | सर्वाणि |

एवं विश्व, एकतर, सम शब्दाः। इतरेषां तु एकतमत्, अन्यत्, अन्यतरत्, इतरत् इत्येवं प्रथमैकवचने, द्वितीयैकवचने, सम्बुद्धौ (Vocative Singular) च रूपाणि ॥

---

९४. अकारान्तः पुंलिङ्गः 'पूर्व' शब्दः (Eastern)

| | | | |
|---|---|---|---|
| प्र. | पूर्वः | पूर्वौ | पूर्वे-पूर्वाः |
| सं. प्र. | हे पूर्व | हे पूर्वौ | हे पूर्वे-हे पूर्वाः |
| द्वि. | पूर्वम् | पूर्वौ | पूर्वान् |
| तृ. | पूर्वेण | पूर्वाभ्यां | पूर्वैः |
| च. | पूर्वस्मै | पूर्वाभ्यां | पूर्वेभ्यः |
| प. | पूर्वस्मात्-पूर्वात्; | पूर्वाभ्यां | पूर्वेभ्यः |
| ष. | पूर्वस्य | पूर्वयोः | पूर्वेषाम् |
| स. | पूर्वस्मिन्-पूर्वे, | पूर्वयोः | पूर्वेषु |

एवं षष्ठवर्गीय 'पर' प्रभृतयः

---

९५: 'पूर्वा' शब्दः स्त्रीलिङ्ग सर्वा शब्दवत्।

एवं स्त्रीलिङ्ग 'परा' प्रभृतयः

९६. अकारान्तः नपुंसकलिङ्गः 'पूर्व' शब्दः (Eastern)

| | | | |
|---|---|---|---|
| प्र. | पूर्वम् | पूर्वे | पूर्वाणि |
| सं. प्र. | हे पूर्व | हे पूर्वे | हे पूर्वाणि |
| द्वि. | पूर्वम् | पूर्वे | पूर्वाणि |

शेषं पुंवत् । एवं 'पर' प्रभृतयः

---

अकारान्तः 'उभ' शब्दः नित्यं द्विवचनान्तः (Both)

| | ९७. *पुंसि | ९८. *स्त्रियाम् | ९९. *क्लीबे |
|---|---|---|---|
| प्र. | उभौ | उभे | उभे |
| सं. प्र. | हे उभौ | हे उभे | हे उभे |
| द्वि. | उभौ | उभे | उभे |
| तृ. | उभाभ्यां | उभाभ्यां | उभाभ्यां |
| च. | उभाभ्यां | उभाभ्यां | उभाभ्यां |
| प. | उभाभ्यां | उभाभ्यां | उभाभ्यां |
| ष. | उभयोः | उभयो, | उभयोः |
| स. | उभयोः | उभयोः | उभयोः |

---

* पुंसि - पुंलिङ्गे ; स्त्रियाम् - स्त्रीलिङ्गे ; क्लीबे - नपुंसकलिङ्गे ।

१००. आकारान्तः पुंलिङ्गः *'उभय' शब्दः (Both)

अस्य द्विवचनं नास्ति

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्र. | उभयः | उभये |
| सं. प्र. | हे उभयः | हे उभये |
| द्वि. | उभयम् | उभयान् |
| तृ. | उभयेन | उभयैः |
| च. | उभयस्मै | उभयेभ्यः |
| प. | उभयस्मात् | उभयेभ्यः |
| ष. | उभयस्य | उभयेषाम् |
| स. | उभयस्मिन् | उभयेषु |

---

१०१. ईकारान्तः स्त्रीलिङ्गः 'उभयी' शब्दः। नदीशब्दवत्।

द्विवचनं तु नास्ति॥

---

१०२ अकारान्तः नपुंसकलिङ्गः 'उभय' शब्दः

प्रथमा-संबोधन-द्वितीयासु विभक्तिषु 'फल' शब्दवत्।

शेषं पुंवत्। अस्यापि द्विवचनं नास्ति।

---

* The word उभय (in all genders) is not used in dual द्विवचन॥

१०३. दकारान्तः पुंलिङ्गः 'तद्' शब्दः (He, that)

| | | | |
|---|---|---|---|
| प्र. | सः | तौ | ते |
| द्वि. | तम् | तौ | तान् |
| तृ. | तेन | ताभ्यां | तैः |
| च. | तस्मै | ताभ्याम् | तेभ्यः |
| प. | तस्मात् | ताभ्यां | तेभ्यः |
| ष. | तस्य | तयोः | तेषां |
| स. | तस्मिन् | तयोः | तेषु |

एव 'त्यद् शब्दः

---

१०४. दकारान्तः स्त्रीलिङ्गः 'तद्' शब्दः (She, that)

| | | | |
|---|---|---|---|
| प्र. | सा | ते | ताः |
| द्वि. | ताम् | ते | ताः |
| तृ | तया | ताभ्यां | ताभिः |
| च. | तस्यै | ताभ्यां | ताभ्यः |
| प. | तस्याः | ताभ्यां | ताभ्यः |
| ष. | तस्याः | तयोः | तासाम् |
| स. | तस्याम् | तयोः | तासु |

एवं 'त्यद्' शब्दः

---

१०५. दकारान्तः नपुंसकलिङ्गः 'तद्' शब्दः (That)

| | | | |
|---|---|---|---|
| प्र. | तत् | ते | तानि |
| द्वि. | तत् | ते | तानि |

शेषं पुंवत्। 'एवं' 'त्यद्' शब्दः।

---

### १०६. दकारान्तः पुंलिङ्गः 'एतद्' शब्दः (This)

| | | | |
|---|---|---|---|
| प्र. | एषः | एतौ | एते |
| द्वि. | एतम्-*एनम्, | एतौ-एनौ, | एतान्-एनान् |
| तृ. | एतेन-एनेन | एताभ्यां | एतैः |
| च. | एतस्मै | एताभ्यां | एतेभ्यः |
| प. | एतस्मात् | एताभ्यां | एतेभ्यः |
| ष. | एतस्य | एतयोः, एनयोः, | एतेषाम् |
| स. | एतस्मिन् | एतयोः, एनयोः | एतेषु |

### १०७. दकारान्तः स्त्रीलिङ्गः 'एतद्' शब्दः (This)

| | | | |
|---|---|---|---|
| प्र. | एषा | एते | एताः |
| द्वि. | एताम्-एनाम्, | एते-एने, | एताः-एनाः |
| तृ. | एतया-एनया | एताभ्यां | एताभिः |
| च. | एतस्यै | एताभ्यां | एताभ्यः |
| प. | एतस्याः | एताभ्यां | एताभ्यः |
| ष. | एतस्याः | एतयोः-एनयोः, | एतासाम् |
| स. | एतस्याम् | एतयोः-एनयोः, | एतासु |

* The optional forms of एतद् and इदम्, viz, एनम्, एनेन etc., are to be used when there is अन्वादेश, i.e., when their proper forms have already been used in a previous clause; एतेन व्याकरणमधीतम् (He has studied Grammar), एनं छन्दोऽध्यापय (Teach him छन्दस्, (prosody) etc. अन्वादेश means the subsequent mention of a thing already mentioned.

१०८. दकारान्तः नपुंसकलिङ्गः 'एतद्' शब्दः (This)

| | | | |
|---|---|---|---|
| प्र. | एतत् | एते | एतानि |
| द्वि. | एतत् -एनत्, | एते-एने, | एतानि-एनानि |

शेषं पुंवत्

---

१०९. दकारान्तः पुंलिङ्गः 'यद्' शब्दः (Who)

| | | | |
|---|---|---|---|
| प्र. | यः | यौ | ये |
| द्वि. | यम् | यौ | यान् |
| तृ. | येन | याभ्यां | यैः |
| च. | यस्मै | याभ्यां | येभ्यः |
| प. | यस्मात् | याभ्यां | येभ्यः |
| ष. | यस्य | ययोः | येषाम् |
| स. | यस्मिन् | ययोः | येषु |

एवं यतरत्, यतमत् शब्दौ

---

११०. दकारान्तः स्त्रीलिङ्गः 'यद्' शब्दः (Who)

| | | | |
|---|---|---|---|
| प्र. | या | ये | याः |
| द्वि. | याम् | ये | याः |
| तृ. | यया | याभ्यां | याभिः |
| च. | यस्यै | याभ्यां | याभ्यः |
| प. | यस्याः | याभ्यां | याभ्यः |

| | | | |
|---|---|---|---|
| ष. | यस्याः | ययोः | यासाम् |
| स. | यस्याम् | ययोः | यासु |

एवं यतरत्, यतमत् शब्दौ

---

११११. दकारान्तः नपुंसकलिङ्गः 'यद्' शब्दः (Who)

| | | | |
|---|---|---|---|
| प्र. | यत् | ये | यानि |
| द्वि. | यत् | ये | यानि |

शेषं पुंवत्। [1]एवं यतरत्, यतमत् शब्दौ

---

११२. दकारान्तः 'युष्मद्' शब्दः त्रिषु लिङ्गेषु समानरूपः (You)

| | | | |
|---|---|---|---|
| प्र. | त्वम् | युवाम् | यूयम् |
| द्वि. | त्वाम्-त्वा[2] | युवाम्-वां | युष्मान्-वः |
| तृ. | त्वया | युवाभ्यां | युष्माभिः |
| च. | तुभ्यम्-ते, | युवाभ्यां-वां | युष्मभ्यं-वः |
| प. | त्वत् | युवाभ्यां | युष्मत् |
| ष. | तव-ते, | युवयोः-वां, | युष्माकं-वः |
| स. | त्वयि | युवयोः | युष्मासु |

---

[1]The two Sabdas यतरत्, and यतमत् become तकारान्त in Nominative, Vocative and Accusative Singulars.

[2]The optional shorter forms of युष्मद् and अस्मद् viz., त्वा, वां, वः, ते and मा, नौ, नः, मे are never used at the begining of a sentence or of a foot (पाद) of a श्लोक, nor can they be used immediately before particles च, ह, हा, अह and एव ॥

११३. दकारान्तः 'अस्मद्' शब्दः त्रिषु लिङ्गेषु समानरूपः (I)

| | | | |
|---|---|---|---|
| प्र. | अहम् | आवाम् | वयम् |
| द्वि. | माम्-मा, | आवाम्-नौ, | अस्मान्-नः |
| तृ. | मया | आवाभ्यां | अस्माभिः |
| च. | मह्यम्-मे | आवाभ्यां-नौ, | अस्मभ्यं-नः |
| प. | मत् | आवाभ्यां | अस्मत् |
| ष. | मम-मे, | आवयोः-नौ, | अस्माकं-नः |
| स. | मयि | आवयोः | अस्मासु |

११४. मकारान्तः पुंलिङ्गः * 'किम्' शब्दः (Who?)

| | | | |
|---|---|---|---|
| प्र. | कः | कौ | के |
| द्वि. | कम् | कौ | कान् |
| तृ. | केन | काभ्यां | कैः |
| च. | कस्मै | काभ्यां | केभ्यः |
| प. | कस्मात् | काभ्यां | केभ्यः |
| ष. | कस्य | कयोः | केषाम् |
| स. | कस्मिन् | कयोः | केषु |

एवं कतर, कतम शब्दौ

* Indefinite pronouns are formed by the addition of चित्, चन or अपि to the various cases of this word in all the genders e.g. कश्चित्, कश्चन, कोऽपि, केनचित्, कयाचन कस्यापि, कस्मिंश्चित्, कयोश्चित् etc.

११५. मकारान्तः स्त्रीलिङ्गः 'किम्' शब्दः (Who?)

| | | | |
|---|---|---|---|
| प्र. | का | के | काः |
| द्वि. | काम् | के | काः |
| तृ. | कया | काभ्यां | काभिः |
| च. | कस्यै | काभ्यां | काभ्यः |
| प. | कस्याः | काभ्यां | काभ्यः |
| ष. | कस्याः | कयोः | कासाम् |
| स. | कस्याम् | कयोः | कासु |

एवं कतर, कतम शब्दौ

---

११६. मकारान्तः नपुंसकलिङ्गः 'किम्' शब्दः (What?)

| | | | |
|---|---|---|---|
| प्र. | किम् | के | कानि |
| द्वि. | किम् | के | कानि |

शेषं पुंवत् । एवं *कतरत्, कतमत् शब्दौ

---

११७. मकारान्तः पुंलिङ्गः 'इदम्' शब्दः (This)

| | | | |
|---|---|---|---|
| प्र. | अयम् | इमौ | इमे |
| द्वि. | इमम्-एनम्, | इमौ-एनौ | इमान्-एनान् |
| तृ. | अनेन-एनेन, | आभ्यां | एभिः |
| च. | अस्मै | आभ्यां | एभ्यः |
| प. | अस्मात् | आभ्यां | एभ्यः |
| ष. | अस्य | अनयोः-एनयोः, | एषाम् |
| स. | अस्मिन् | अनयोः-एनयोः, | एषु |

---

The २ शब्दाs कतरत् and कतमत्, become तकारान्त in Nominative Vocative and Accusative Singulars,

११८. मकारान्तः स्त्रीलिङ्गः 'इदम्' शब्दः (This)

| | | | |
|---|---|---|---|
| प्र. | इयम् | इमे | इमाः |
| द्वि. | इमाम्-एनाम्, | इमे-एने, | इमाः-एनाः |
| तृ. | अनया-एनया, | आभ्यां | आभिः |
| च. | अस्यै | आभ्यां | आभ्यः |
| प. | अस्याः | आभ्यां | आभ्यः |
| ष. | अस्याः | अनयोः-एनयोः, | आसाम् |
| स. | अस्याम् | अनयोः-एनयोः, | आसु |

११९. मकारान्तः नपुंसकलिङ्गः 'इदम्' शब्दः (This)

| | | | |
|---|---|---|---|
| प्र. | इदम् | इमे | इमानि |
| द्वि. | इदम्-एनत् | इमे-एने, | इमानि-एनानि |

शेषं पुंवत्

१२०. सकारान्तः पुंलिङ्गः 'अदस्' शब्दः (This)

| | | | |
|---|---|---|---|
| प्र. | असौ | अमू | अमी |
| द्वि. | अमुम् | अमू | अमून् |
| तृ. | अमुना | अमूभ्यां | अमीभिः |
| च. | अमुष्मै | अमूभ्यां | अमीभ्यः |

| | | | |
|---|---|---|---|
| पं. | अमुष्मात् | अमूभ्यां | अमीभ्यः |
| ष. | अमुष्य | अमुयोः | अमीषाम् |
| स. | अमुष्मिन् | अमुयोः | अमीषु |

१२१. सकारान्तः स्त्रीलिङ्गः 'अदस्' शब्दः (She)

| | | | |
|---|---|---|---|
| प्र. | असौ | अमू | अमूः |
| द्वि. | अमूम् | अमू | अमूः |
| तृ. | अमुया | अमूभ्यां | अमूभिः |
| च. | अमुष्यै | अमूभ्यां | अमूभ्यः |
| पं. | अमुष्याः | अमूभ्यां | अमूभ्यः |
| ष. | अमुष्याः | अमुयोः | अमूषाम् |
| स. | अमुष्याम् | अमुयोः | अमूषु |

१२२. सकारान्तः नपुंसकलिङ्गः 'अदस्' शब्दः (That)

| | | | |
|---|---|---|---|
| प्र. | अदः | अमू | अमूनि |
| द्वि. | अदः | अमू | अमूनि |

शेषं पुंवत्

१२३. तकारान्तः पुंलिङ्गः 'त्वत्' शब्दः (Other)

| | | | |
|---|---|---|---|
| प्र. | त्वत् | त्वतौ | त्वतः |

शेषं पुंलिङ्ग 'मरुत्' शब्दवत्

'त्वत्' शब्दः स्त्रीलिङ्गे ईकारान्तः (Other)

स्त्रीलिङ्ग सरित् शब्दवत्

---

तकारान्तः नपुंसकलिङ्गः 'त्वत्' शब्दः (other)

'जगत्' शब्दवत्

---

१२४ तकारान्तः पुंलिङ्गः 'भवत्' शब्दः (Thee)

| | | | |
|---|---|---|---|
| प्र. | *भवान् | भवन्तौ | भवन्तः |

शेषं 'धीमत्' शब्दवत्

---

१२५. 'भवत्' शब्दः स्त्रीलिङ्गे ईकारान्तः (Thee)

| | | | |
|---|---|---|---|
| प्र. | भवती | भवत्यौ | भवत्यः |

शेषं 'नदी' शब्दवत्

---

तकारान्तः नपुंसकलिङ्गः 'भवत्' शब्दः (Thee)

| | | | |
|---|---|---|---|
| प्र. | भवत् | भवती | भवन्ति |

शेषं 'जगत्' शब्दवत्

॥ इति सर्वनामशब्द प्रकरणम् ॥

—: ० :—

---

*भवच्छब्दयोगे प्रथमपुरुष एव प्रयोक्तव्यः न तु मध्यमपुरुषः; यथा भवान् गच्छति, भवती वदति-इत्यादि ॥

# अथ सङ्ख्याशब्द प्रकरणम्

## सङ्ख्याशब्दाः (Numerals)

अकारान्तः* 'एक' शब्दः—नित्यमेकवचनान्तः (One)

| | १२६. पुंसि | १२७. स्त्रियाम् | १२८. क्लीबे |
|---|---|---|---|
| प्र. | एकः | एका | एकम् |
| द्वि. | एकम् | एकाम् | एकम् |
| तृ. | एकेन | एकया | एकेन |
| च. | एकस्मै | एकस्यै | एकस्मै |
| प. | एकस्मात् | एकस्याः | एकस्मात् |
| ष. | एकस्य | एकस्याः | एकस्य |
| स. | एकस्मिन् | एकस्याम् | एकस्मिन् |

सङ्ख्याव्यतिरिक्तेष्वर्थेषु अस्य द्विवचन-बहुवचने अपि स्तः। तदा अस्य 'सर्व' शब्दवत् रूपाणि ॥

इकारान्तः 'द्वि' शब्दः—नित्यं द्विवचनान्तः (Two)

| | १२९. पुंसि | १३०. स्त्रियाम् | १३१. क्लीबे |
|---|---|---|---|
| प्र. | द्वौ | द्वे | द्वे |
| द्वि. | द्वौ | द्वे | द्वे |

* एक when means 'one' is declined only in the Singular; but in other senses it is declined in the Dual and Plural also.

| | | | |
|---|---|---|---|
| तृ. | द्वाभ्यां | द्वाभ्यां | द्वाभ्यां |
| च. | द्वाभ्यां | द्वाभ्यां | द्वाभ्यां |
| प. | द्वाभ्यां | द्वाभ्यां | द्वाभ्यां |
| ष. | द्वयोः | द्वयोः | द्वयोः |
| स. | द्वयोः | द्वयोः | द्वयोः |

इकारान्तः 'त्रि' शब्दः—नित्यं बहुवचनान्तः (Three)

| | १३२. पुंसि | १३३. स्त्रियाम् | १३४. क्लीबे |
|---|---|---|---|
| प्र. | त्रयः | तिस्रः | त्रीणि |
| द्वि. | त्रीन् | तिस्रः | त्रीणि |
| तृ. | त्रिभिः | तिसृभिः | त्रिभिः |
| च. | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| प. | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| ष. | त्रयाणाम् | तिसृणाम् | त्रयाणाम् |
| स. | त्रिषु | तिसृषु | त्रिषु |

रेफान्तः 'चतुर्' शब्दः नित्यं बहुवचनान्तः (Four)

| | १३५. Mas | १३६. Feminine | १३७. Neuter |
|---|---|---|---|
| प्र. | चत्वारः | चतस्रः | चत्वारि |
| द्वि. | चतुरः | चतस्रः | चत्वारि |
| तृ. | चतुर्भिः | चतसृभिः | चतुर्भिः |
| च. | चतुर्भ्यः | चतसृभ्यः | चतुर्भ्यः |

| | | | |
|---|---|---|---|
| प. | चतुर्भ्यः | चतसृभ्यः | चतुर्भ्यः |
| ष. | चतुर्णाम् | चतसृणाम् | चतुर्णाम् |
| स. | चतुर्षु | चतसृषु | चतुर्षु |

'पञ्चन्' प्रभृतयः 'नवदशन्' पर्यन्ताः शब्दाः ; have same declension in all Genders and in Plural only.

| १३८. पञ्चन् (नान्तः) | | १३९. षष् (षान्तः) | १४०. सप्तन् (नान्तः) |
|---|---|---|---|
| प्र. | पञ्च | षट् | सप्त |
| द्वि. | पञ्च | षट् | सप्त |
| तृ. | पञ्चभिः | षड्भिः | सप्तभिः |
| च. | पञ्चभ्यः | षड्भ्यः | सप्तभ्यः |
| प. | पञ्चभ्यः | षड्भ्यः | सप्तभ्यः |
| ष. | पञ्चानाम् | षण्णाम् | सप्तानाम् |
| स. | पञ्चसु | षट्सु | सप्तसु |

१४१. नकारान्तः 'अष्टन्' शब्दः (Eight)—अस्य द्विविधं रूपम्

| | प्रथमं रूपम् (ह्रस्वान्तम्) | द्वितीयं रूपम् (दीर्घान्तम्) |
|---|---|---|
| प्र. | अष्ट | अष्टौ |
| द्वि. | अष्ट | अष्टौ |
| तृ. | अष्टभिः | अष्टाभिः |
| च. | अष्टभ्यः | अष्टाभ्यः |
| प. | अष्टभ्यः | अष्टाभ्यः |

| | | |
|---|---|---|
| ष. | अष्टानाम् | अष्टानाम् |
| स. | अष्टसु | अष्टासु |

* 'नवन्' प्रभृतयो 'नवदशन्' पर्यन्ताः शब्दाः 'सप्तन्' शब्दवत् ॥

**विंशत्यादयः**—Numerals 20 and above

विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः एते स्त्रीलिङ्गाः । त्रिंशत्, चत्वारिंशत्, पञ्चाशत्- एते त्रयः तकारान्ताः, अन्ये इकारान्ताः इति विशेषः । एतेषां द्विधा प्रयोगः संभवति, विशेषणतया विशेष्यतया च । विशेषणतया प्रयोगे एकवचनमेव । यथा—'विंशतिः कुमाराः' इत्यादि । विशेष्यतया प्रयोगे तु द्विवचन-बहुवचने अपि स्तः । यथा 'रूप्यकाणां द्वे विंशती, 'गवां तिस्रः विंशतयः' इत्यादि । अत्र इकारान्तानां 'मति' शब्दवत्, तकारान्तानां 'सरित्' शब्दवत् च रूपाणि द्रष्टव्यानि ॥

शत सहस्र-अयुत-लक्ष-प्रयुत शब्दाः अकारान्त-नपुंसकलिङ्गाः, कोटिशब्दः इकारान्तस्त्रीलिङ्गः । एतेषामपि विशेषणतया प्रयोगे एकवचनमेव, यथा—'शतं जनाः' 'सहस्रं स्त्रियः' इत्यादि । विशेष्यतया प्रयोगे तु द्विवचन-बहुवचने अपि भवतः, यथा—'गवां द्वे शते,' 'रूप्यकाणां त्रीणि सहस्राणि'—इत्यादि ॥

१४२. इकारान्तः 'कति' शब्दः-नित्यंबहुवचनान्तः (How many)
Same in all Genders

**कति, कति, कतिभिः, कतिभ्यः कतिभ्यः कतीनाम् कतिषु**

॥ इति संख्याशब्दाः ॥

* Refer to pages 79 and 80.

## अथ सङ्ख्येयशब्दाः—(Ordinals)

१४३. अकारान्तः पुंलिङ्गः ' **प्रथम** ' शब्दः (First)

| | | | |
|---|---|---|---|
| प्र. | प्रथमः | प्रथमौ | प्रथमे—प्रथमाः |
| सं प्र. | हे प्रथम | हे प्रथमौ | हे प्रथमे—हे प्रथमाः |

शेषं ' राम ' शब्दवत्

एवं चरम-अल्प-अर्ध-कतिपय-द्वय-द्वितय-त्रय-त्रितय चतुष्टयप्रभृतयः ॥

१४४. आकारान्तः स्त्रीलिङ्गः ' **प्रथमा** ' शब्दः (First)

| | | | |
|---|---|---|---|
| प्र. | प्रथमा | प्रथमे | प्रथमाः |

इत्यादि ' रमा ' शब्दवत् । एवं ' चरमा ' आदयोऽपि ॥

१४५. अकारान्तः नपुंसकलिङ्गः ' **प्रथम** ' शब्दः (First)

| | | | |
|---|---|---|---|
| प्र. | प्रथमम् | प्रथमे | प्रथमानि |

इत्यादि ' फल ' शब्दवत् । ' चरमम् ' इत्यादयोऽप्येवमेव ॥

१४६. अकारान्तः पुंलिङ्गः ' **द्वितीय** ' शब्दः (Second)

| | | | |
|---|---|---|---|
| प्र. | द्वितीयः | द्वितीयौ | द्वितीयाः |
| सं प्र. | हे द्वितीय | हे द्वितीयौ | हे द्वितीयाः |
| द्वि. | द्वितीयम् | द्वितीयौ | द्वितीयान् |
| तृ. | द्वितीयेन | द्वितीयाभ्यां | द्वितीयैः |

| | | | |
|---|---|---|---|
| च. | *द्वितीयस्मै-द्वितीयाय, | द्वितीयाभ्यां | द्वितीयेभ्यः |
| ,, | द्वितीयस्मात्-द्वितीयात्, | द्वितीयाभ्यां | द्वितीयेभ्यः |
| ष. | द्वितीयस्य | द्वितीययोः | द्वितीयानाम् |
| स. | द्वितीयस्मिन्-द्वितीये, | द्वितीययोः | द्वितीयेषु |

एवं 'तृतीय' शब्दः

---

१४७. आकारान्तः स्त्रीलिङ्गः 'द्वितीया' शब्दः (Second)

'रमा' शब्दवत्। किन्तु चतुर्थी-पञ्चमी-षष्ठी-सप्तम्येक-वचनेषु - द्वितीयस्यै - द्वितीयायै; द्वितीयस्याः - द्वितीयायाः; द्वितीयस्याः - द्वितीयायाः, द्वितीयस्याम् - द्वितीयायाम् - इति रूपे विशेषः। एवं तृतीयाशब्दोऽपि ॥

---

१४८. अकारान्तः नपुंसकलिङ्गः 'द्वितीय' शब्दः (Second)

| | | | |
|---|---|---|---|
| प्र. | द्वितीयम् | द्वितीये | द्वितीयानि |
| सं. प्र | हे द्वितीय | हे द्वितीये | हे द्वितीयानि |
| द्वि. | द्वितीयम् | द्वितीये | द्वितीयानि |

शेषं पुंवत्। एवं 'तृतीय' शब्दः ॥

---

[1]चतुर्थ-पञ्चमादयः शब्दाः सर्वेऽपि—पुंसि 'राम' शब्दवत्; स्त्रियां 'नदी' शब्दवत्; क्लीबे 'फल' शब्दवच्च द्रष्टव्याः ॥

---

*द्वितीय and तृतीय (in all genders) are optionally declined like सर्व in the Dative, Ablative, Gentitive and Locative Singulars. Refer to page 79.

अत्र कोटि पर्यन्ता: सङ्ख्याशब्दा:, तेभ्यो निष्पन्ना: पूरण-प्रत्ययान्ता: सङ्ख्येय शब्दाश्च, लिङ्गत्रयेऽपि प्रदर्श्यन्ते—

| सङ्ख्याशब्दा: (Cardinals) | | | | सङ्ख्येयशब्दा: (Ordinals) | | |
|---|---|---|---|---|---|---|
| | Mas. | Fem. | Neuter. | Mas. | Fem. | Neuter. |
| १ | एक: | एका | एकम्[1] | *प्रथम: | प्रथमा | प्रथमम् |
| २ | द्वौ | द्वे | द्वे[2] | द्वितीय: | द्वितीया | द्वितीयम् |
| ३ | त्रय: | तिस्र: | त्रीणि[3] | तृतीय: | तृतीया | तृतीयम् |
| ४ | चत्वार: | चतस्र: | चत्वारि[4] | चतुर्थ: | चतुर्थी | चतुर्थम् |
| | | | | तुरीय: | तुरीया | तुरीयम् |
| | | | | तुर्य: | तुर्या | तुर्यम् |
| ५ | पञ्च | | | पञ्चम: | पञ्चमी | पञ्चमम् |
| ६ | षट् | | | षष्ठ: | षष्ठी | षष्ठम् |
| ७ | सप्त | | | सप्तम: | सप्तमी | सप्तमम् |
| ८ | अष्ट, अष्टौ | | | अष्टम: | अष्टमी | अष्टमम् |
| ९ | नव | | | नवम: | नवमी | नवमम् |
| १० | दश | | | दशम: | दशमी | दशमम् |

* सङ्ख्येयशब्दा: (*i.e.*,) पूरणप्रत्ययान्ताऽ [1]from एक, द्वि, त्रि, चतुर् and षष् are irregulary formed; पञ्चन्, सप्तन्, नवन्, and दशन् they are formed by dropping the final न् and adding म.

1, 2, 3, 4—Refer to pages 73 and 74.

| सङ्ख्याशब्दाः (Cardinals) | | सङ्ख्येयशब्दाः (Ordinals) पुंसि | स्त्रियाम् | क्लीबे |
|---|---|---|---|---|
| ११ | एकादश | [1]एकादशः | एकादशी | एकादशम् |
| १२ | द्वादश | द्वादशः | द्वादशी | द्वादशम् |
| १३ | त्रयोदश | त्रयोदशः | त्रयोदशी | त्रयोदशम् |
| १४ | चतुर्दश | चतुर्दशः | चतुर्दशी | चतुर्दशम् |
| १५ | पञ्चदश | पञ्चदशः | पञ्चदशी | पञ्चदशम् |
| १६ | षोडश | षोडशः | षोडशी | षोडशम् |
| १७ | सप्तदश | सप्तदशः | सप्तदशी | सप्तदशम् |
| १८ | अष्टादश | अष्टादशः | अष्टादशी | अष्टादशम् |
| १९ | नवदश[2] | नवदशः | नवदशी | नवदशम् |
| | एकोनविंशः | एकोनविंशः | एकोनविंशी | एकोनविंशम् |
| | एकान्नविंशतिः | एकान्नविंशः | एकान्नविंशी | एकान्नविंशम् |
| | ऊनविंशतिः | ऊनविंशः | ऊनविंशी | ऊनविंशम् |
| २० | विंशतिः[3] | विंशः | विंशी | विंशम् |
| | | विंशतितमः | विंशतितमी | विंशतितमम् |
| २१ | एकविंशतिः | एकविंशः | एकविंशी | एकविंशम् |

1. The ordinals from एकादशन् to नवदशन् are formed by dropping the final न् *i. e.* एकादश etc.

2. The 9th compound numeral (19, 29, 39, etc. may also be made up by prefixing एकोन (एक+ऊन), एकान्न (एकात्+न) or ऊन=less by one to the higher.

3. See foot-notes on Page 81.

| सङ्ख्याशब्दाः (Cardinals) | सङ्ख्येयशब्दाः (Ordinals) पुंसि | स्त्रियाम् | क्लीबे |
|---|---|---|---|
| २२ द्वाविंशतिः[1] | *द्वाविंशः | द्वाविंशी | द्वाविंशम् |
| २३ त्रयोविंशतिः | त्रयोविंशः | त्रयोविंशी | त्रयोविंशम् |
| २४ चतुर्विंशतिः | चतुर्विंशः | चतुर्विंशी | चतुर्विंशम् |
| २५ पञ्चविंशतिः | पञ्चविंशः | पञ्चविंशी | पञ्चविंशम् |
| २६ षड्विंशतिः | षड्विंशः | षड्विंशी | षड्विंशम् |
| २७ सप्तविंशतिः | सप्तविंशः | सप्तविंशी | सप्तविंशम् |
| २८ अष्टाविंशतिः | अष्टाविंशः | अष्टाविंशी | अष्टाविंशम् |

*The ordinals from विंशति and above have two forms ; The first form is by adding तम invariably ; *e.g.*, विंशतितम, त्रिंशत्तम, षष्टितम, etc.

The second form is :—

(a) By dropping ति of विंशति, group and forming its Compounds *e.g.*, विंश, एकविंश, etc.

(b) By dropping त् of त्रिंशत्, चत्वारिंशत् and पञ्चाशत् groups ; त्रिंशः, चत्वारिंश and पञ्चाश.

(c) By changing the final इ to अ of एकषष्टि upto नवनवतिः *e.g.*, एकषष्ट, एकसप्तत, etc.

Note that the following 4 cardinals षष्टि, सप्तति, अशीति and नवति have only the first form, *e.g.*, षष्टितम, सप्ततितम, अशीतितम and नवतितम ॥

[1] In the compounds of सङ्ख्याशब्दाs (12, 22, 23, 24 etc). द्वि, त्रि and अष्टन्, are changed to द्वा, त्रयः and अष्टा necessarily before दशन्, विंशति and त्रिंशत् and optionally before चत्वारिंशत्, पञ्चाशत्, षष्टि, सप्तति and नवति. Before अशीति they remain unchanged.

| सङ्ख्याशब्दाः (Cardinals) | सङ्ख्येयशब्दाः (Ordinals) पुंसि | स्त्रियाम् | क्लीबे |
|---|---|---|---|
| २९ नवविंशतिः | नवविंशः | नवविंशी | नवविंशम् |
| ३० त्रिंशत् | त्रिंशः | त्रिंशी | त्रिंशम् |
| ३१ एकत्रिंशत् | एकत्रिंशः | एकत्रिंशी | एकत्रिंशम् |
| ३२ द्वात्रिंशत् | द्वात्रिंशः | द्वात्रिंशी | द्वात्रिंशम् |
| ३३ त्रयस्त्रिंशत् | त्रयस्त्रिंशः | त्रयस्त्रिंशी | त्रयस्त्रिंशम् |
| ३४ चतुस्त्रिंशत् | चतुस्त्रिंशः | चतुस्त्रिंशी | चतुस्त्रिंशम् |
| ३५ पञ्चत्रिंशत् | पञ्चत्रिंशः | पञ्चत्रिंशी | पञ्चत्रिंशम् |
| ३६ षट्त्रिंशत् | षट्त्रिंशः | षट्त्रिंशी | षट्त्रिंशम् |
| ३७ सप्तत्रिंशत् | सप्तत्रिंशः | सप्तत्रिंशी | सप्तत्रिंशम् |
| ३८ अष्टात्रिंशत् | अष्टात्रिंशः | अष्टात्रिंशी | अष्टात्रिंशम् |
| ३९ नवत्रिंशत् | नवत्रिंशः | नवत्रिंशी | नवत्रिंशम् |
| ४० चत्वारिंशत् | चत्वारिंश | चत्वारिंशी | चत्वारिंशम् |
| ४१ एकचत्वारिंशत् | एकचत्वारिंशः | एकचत्वारिंशी | एकचत्वारिंशम् |
| ४२ द्वाचत्वारिंशत् | द्वाचत्वारिंशः | द्वाचत्वारिंशी | द्वाचत्वारिंशम् |
| द्विचत्वारिंशत् | द्विचत्वारिंशः | द्विचत्वारिंशी | द्विचत्वारिंशम् |
| ४३ त्रयश्चत्वारिंशत् | त्रयश्चत्वारिंशः | त्रयश्चत्वारिंशी | त्रयश्चत्वारिंशम् |
| त्रिचत्वारिंशत् | त्रिचत्वारिंशः | त्रिचत्वारिंशी | त्रिचत्वारिंशम् |
| ४४ चतुश्चत्वारिंशत् | चतुश्चत्वारिंशः | चतुश्चत्वारिंशी | चतुश्चत्वारिंशम् |
| ४५ पञ्चचत्वारिंशत् | पञ्चचत्वारिंशः | पञ्चचत्वारिंशी | पञ्चचत्वारिंशम् |
| ४६ षट्चत्वारिंशत् | षट्चत्वारिंशः | षट्चत्वारिंशी | षट्चत्वारिंशम् |
| ४७ सप्तचत्वारिंशत् | सप्तचत्वारिंशः | सप्तचत्वारिंशी | सप्तचत्वारिंशम् |

| सङ्ख्याशब्दाः (Cardinals) | सङ्ख्येयशब्दाः (Ordinals) पुंसि | स्त्रियाम् | क्लीबे |
|---|---|---|---|
| ४८ अष्टचत्वारिंशत् | अष्टचत्वारिंशः | अष्टचत्वारिंशी | अष्टचत्वारिंशम् |
| अष्टाचत्वारिंशत् | अष्टाचत्वारिंशः | अष्टाचत्वारिंशी | अष्टाचत्वारिंशम् |
| ४९ नवचत्वारिंशत् | नवचत्वारिंशः | नवचत्वारिंशी | नवचत्वारिंशम् |
| ५० पञ्चाशत् | पञ्चाशः | पञ्चाशी | पञ्चाशम् |
| ५१ एकपञ्चाशत् | एकपञ्चाशः | एकपञ्चाशी | एकपञ्चाशम् |
| ५२ द्वापञ्चाशत् | द्वापञ्चाशः | द्वापञ्चाशी | द्वापञ्चाशम् |
| द्विपञ्चाशत् | द्विपञ्चाशः | द्विपञ्चाशी | द्विपञ्चाशम् |
| ५३ त्रयःपञ्चाशत् | त्रयःपञ्चाशः | त्रयःपञ्चाशी | त्रयःपञ्चाशम् |
| त्रिपञ्चाशत् | त्रिपञ्चाशः | त्रिपञ्चाशी | त्रिपञ्चाशम् |
| ५४ चतुःपञ्चाशत् | चतुःपञ्चाशः | चतुपञ्चाशी | चतुःपञ्चाशम् |
| ५५ पञ्चपञ्चाशत् | पञ्चपञ्चाशः | पञ्चपञ्चाशी | पञ्चपञ्चाशम् |
| ५६ षट्पञ्चाशत् | षट्पञ्चाशः | षट्पञ्चाशी | षट्पञ्चाशम् |
| ५७ सप्तपञ्चाशत् | सप्तपञ्चाशः | सप्तपञ्चाशी | सप्तपञ्चाशम् |
| ५८ अष्टपञ्चाशत् | अष्टपञ्चाशः | अष्टपञ्चाशी | अष्टपञ्चाशम् |
| अष्टापञ्चाशत् | अष्टापञ्चाशः | अष्टापञ्चाशी | अष्टापञ्चाशम् |
| ५९ नवपञ्चाशत् | नवपञ्चाशः | नवपञ्चाशी | नवपञ्चाशम् |
| ६० षष्टिः | षष्टितमः | षष्टितमी | षष्टितमम् |
| ६१ एकषष्टिः | एकषष्टः | एकषष्टी | एकषष्टम् |
| ६२ द्वाषष्टिः | द्वाषष्टः | द्वाषष्टी | द्वाषष्टम् |
| द्विषष्टिः | द्विषष्टः | द्विषष्टी | द्विषष्टम् |
| ६३ त्रयःषष्टिः | त्रयःषष्टः | त्रयःषष्टी | त्रयःषष्टम् |
| त्रिषष्टिः | त्रिषष्टः | त्रिषष्टी | त्रिषष्टम् |

| सङ्ख्याशब्दा: (Cardinals) | सङ्ख्येयशब्दा: (Ordinals) पुंसि | स्त्रियाम् | क्लीबे |
|---|---|---|---|
| ६४ चतु:षष्टि: | चतु:षष्ट: | चतु:षष्टीं | चतु:षष्टम् |
| ६५ पञ्चषष्टि: | पञ्चषष्ट: | पञ्चषष्टी | पञ्चषष्टम् |
| ६६ षट्षष्टि: | षट्षष्ट: | षट्षष्टी | षट्षष्टम् |
| ६७ सप्तषष्टि: | सप्तषष्ट: | सप्तषष्टी | सप्तषष्टम् |
| ६८ अष्टषष्टि: | अष्टषष्ट: | अष्टषष्टी | अष्टषष्टम् |
| अष्टाषष्टि: | अष्टाषष्ट: | अष्टाषष्टी | अष्टाषष्टम् |
| ६९ नवषष्टि: | नवषष्ट: | नवषष्टी | नवषष्टम् |
| ७० सप्तति: | सप्ततितम: | सप्ततितमी | सप्ततितमम् |
| ७१ एकसप्तति: | एकसप्तत: | एकसप्तती | एकसप्ततम् |
| ७२ द्वासप्तति: | द्वासप्तत: | द्वासप्तती | द्वासप्ततम् |
| द्विसप्तति: | द्विसप्तत: | द्विसप्तती | द्विसप्ततम् |
| ७३ त्रय:सप्तति: | त्रय:सप्तत: | त्रय:सप्तती | त्रय:सप्ततम् |
| त्रिसप्तति: | त्रिसप्तत: | त्रिसप्तती | त्रिसप्ततम् |
| ७४ चतु:सप्तति: | चतु:सप्तत: | चतु:सप्तती | चतु:सप्ततम् |
| ७५ पञ्चसप्तति: | पञ्चसप्तत: | पञ्चसप्तती | पञ्चसप्ततम् |
| ७६ षट्सप्तति: | षट्सप्तत: | षट्सप्तती | षट्सप्ततम् |
| ७७ सप्तसप्तति: | सप्तसप्तत: | सप्तसप्तती | सप्तसप्ततम् |
| ७८ अष्टसप्तति: | अष्टसप्तत: | अष्टसप्तती | अष्टसप्ततम् |
| अष्टासप्तति: | अष्टासप्तत: | अष्टासप्तती | अष्टासप्ततम् |
| ७९ नवसप्तति: | नवसप्तत: | नवसप्तती | नवसप्ततम् |
| ८० अशीति: | अशीतितम: | अशीतितमी | अशीतितमम् |
| ८१ एकाशीति: | एकाशीत: | एकाशीती | एकाशीतम् |

| सङ्ख्याशब्दाः (Cardinals) | सङ्ख्येयशब्दाः (Ordinals) पुंसि | स्त्रियाम् | क्लीबे |
|---|---|---|---|
| ८२ द्व्यशीतिः | द्व्यशीतः | द्व्यशीती | द्व्यशीतम् |
| ८३ त्र्यशीतिः | त्र्यशीतः | त्र्यशीती | त्र्यशीतम् |
| ८४ चतुरशीतिः | चतुरशीतः | चतुरशीती | चतुरशीतम् |
| ८५ पञ्चाशीतिः | पञ्चाशीतः | पञ्चाशीती | पञ्चाशीतम् |
| ८६ षडशीतिः | षडशीतः | षडशीती | षडशीतम् |
| ८७ सप्ताशीतिः | सप्ताशीतः | सप्ताशीती | सप्ताशीतम् |
| ८८ अष्टाशीतिः | अष्टाशीतः | अष्टाशीती | अष्टाशीतम् |
| ८९ नवाशीतिः | नवाशीतः | नवाशीती | नवाशीतम् |
| ९० नवतिः | नवतितमः | नवतितमी | नवतितमम् |
| ९१ एकनवतिः | एकनवतः | एकनवती | एकनवतम् |
| ९२ द्वानवतिः | द्वानवतः | द्वानवती | द्वानवतम् |
| द्विनवतिः | द्विनवतः | द्विनवती | द्विनवतम् |
| ९३ त्रयोनवतिः | त्रयोनवतः | त्रयोनवती | त्रयोनवतम् |
| त्रिनवतिः | त्रिनवतः | त्रिनवती | त्रिनवतम् |
| ९४ चतुर्नवतिः | चतुर्नवतः | चतुर्नवती | चतुर्नवतम् |
| ९६ षण्णवतिः | षण्णवतः | षण्णवती | षण्णवतम् |
| ९७ सप्तनवतिः | सप्तनवतः | सप्तनवती | सप्तनवतम् |
| ९८ अष्टनवतिः | अष्टनवतः | अष्टनवती | अष्टनवतम् |
| अष्टानवतिः | अष्टानवतः | अष्टानवती | अष्टानवतम् |
| ९९ नवनवतिः | नवनवतः | नवनवती | नवनवतम् |
| | नवनवतितमः | नवनवतितमी | नवनवतितमम् |

| सङ्ख्याशब्दाः (Cardinals) | | सङ्ख्येयशब्दाः (Ordinals) पुंसि | स्त्रियाम् | क्लिबे |
|---|---|---|---|---|
| १०० | [1]शतम् | शततमः | शततमी | शततमम् |
| १००० | सहस्रम् | सहस्रतमः | सहस्रतमी | सहस्रतमम् |
| १०००० | अयुतम् | अयुततमः | अयुततमी | अयुततमम् |
| १००००० | लक्षम्-लक्षा; | लक्षतमः | लक्षतमी | लक्षतमम् |
| १०००००० | प्रयुतम् | प्रयुततमः | प्रयुततमी | प्रयुततमम् |
| १००००००० | कोटिः | कोटितमः | कोटितमी | कोटितमम् |

*The ordinals from शत and above are formed only by adding तम *e.g.*, शततम, सहस्रतम, कोटितम etc.

The other cardinals above कोटि are :—

अर्बुद, अब्ज, खर्व, महापद्म, शंकु, जलधि, अन्त, मध्य and परार्ध। Each of these is ten times as great as the preceding. Refer to the following slokas :—

एक-दश-शत सहस्रायुत-लक्ष-प्रयुत-कोटयः क्रमशः ।
अर्बुदमब्जं खर्व-निखर्व-महापद्म-शङ्कवस्तस्मात् ॥
जलधिश्चान्तं मध्यं परार्धमिति दशगुणोत्तराः संज्ञाः ।
सङ्ख्यायाः स्थानानां व्यवहारार्थं कृताः पूर्वैः ॥

॥ इति सङ्ख्या-सङ्ख्येयशब्दाः ॥

॥ इति सङ्ख्याशब्द प्रकरणम् ॥

# अथ विशेष शब्द विभागः

## अजन्त पुंलिङ्ग प्रकरणम्

### १४९. अकारान्तः पुंलिङ्गः 'ऐक्ष्वाक' शब्दः

(Descendant of इक्ष्वाकु)

| | | | |
|---|---|---|---|
| प्र. | ऐक्ष्वाकः | ऐक्ष्वाकौ | इक्ष्वाकवः |
| सं. प्र. | हे ऐक्ष्वाक | हे ऐक्ष्वाकौ | हे इक्ष्वाकवः |
| द्वि. | ऐक्ष्वाकं | ऐक्ष्वाकौ | इक्ष्वाकून् |

इत्यादि एकवचन द्विवचनयोः 'राम' शब्दवत्, बहुवचने 'गुरु' शब्दवत् च रूपाणि ॥

### १५०. अकारान्तः पुंलिङ्गः 'निर्जर' शब्दः (God)

| | | | |
|---|---|---|---|
| प्र. | निर्जरः | निर्जरौ<br>निर्जरसौ | निर्जराः<br>निर्जरसः |
| सं. प्र. | हे निर्जर | हे निर्जरौ<br>हे निर्जरसौ | हे निर्जराः<br>हे निर्जरसः |
| द्वि. | निर्जरम्<br>निर्जरसम् | निर्जरौ<br>निर्जरसौ | निर्जरान्<br>निर्जरसः |
| तृ. | निर्जरेण<br>निर्जरसा | निर्जराभ्यां | निर्जरैः |
| च. | निर्जराय<br>निर्जरसे | निर्जराभ्यां | निर्जरेभ्यः |

* The word जरा optionally assume the forms of जरस् before the vowel terminations.

सूत्रम्—'जराया जरस् अन्यतरस्याम्' इति पाणिनिमहर्षिः ।

| | | | |
|---|---|---|---|
| प. | निर्जरात् / निर्जरसः | निर्जराभ्यां | निर्जरेभ्यः |
| ष. | निर्जरस्य / निर्जरसः | निर्जरयोः / निर्जरसोः | निर्जराणाम् / निर्जरसाम् |
| स. | निर्जरे / निर्जरसि | निर्जरयोः / निर्जरसोः | निर्जरेषु |

एवं अजर, विजर प्रभृतयः

---

## १५१. पाद, १५२. दन्त, १५३. मास शब्दाः

अकारान्तानां पाद, दन्त, मास शब्दानां पद्, दत्, मास् इत्यादेशा विकल्पेन भवन्ति। ते च यथाक्रमं 'सुहृद्' 'मरुत्', 'मास्' शब्दवत् द्रष्टव्याः ॥ (See Sabdas 38, 34, 68)

---

### १५४. आकारान्तः पुंलिङ्गः 'विश्वपा' शब्दः
(The Protector of all)

| | | | |
|---|---|---|---|
| प्र. | विश्वपाः | विश्वपौ | विश्वपाः |
| सं. प्र. | हे विश्वपाः | हे विश्वपौ | हे विश्वपाः |
| द्वि. | विश्वपाम् | विश्वपौ | विश्वपः |
| तृ. | विश्वपा | विश्वपाभ्यां | विश्वपाभिः |
| च. | विश्वपे | विश्वपाभ्यां | विश्वपाभ्यः |
| प. | विश्वपः | विश्वपाभ्यां | विश्वपाभ्यः |
| ष. | विश्वपः | विश्वपोः | विश्वपाम् |
| स. | विश्वपि | विश्वपोः | विश्वपासु |

एवं सोमपा, शङ्खध्मा प्रभृतयः ॥

---

१५५. आकारन्तः पुंलिङ्गः 'हाहा' शब्दः (Name of a गन्धर्व)

| | | | |
|---|---|---|---|
| प्र. | हाहाः | हाहौ | हाहाः |
| सं प्र. | हे हाहाः | हे हाहौ | हे हाहाः |
| द्वि. | हाहाम् | हाहौ | हाहान् |
| तृ. | हाहा | हाहाभ्यां | हाहाभिः |
| च. | हाहै | हाहाभ्यां | हाहाभ्यः |
| प. | हाहाः | हाहाभ्यां | हाहाभ्यः |
| ष. | हाहाः | हाहौः | हाहाम् |
| स. | हाहे | हाहौः | हाहासु |

---

१५६. इकारान्तः पुंलिङ्गः 'औडुलोमि' शब्दः
(Descendant of उडुलोमन्)

| | | | |
|---|---|---|---|
| प्र. | औडुलोमिः | औडुलोमी | उडुलोमाः |
| सं प्र. | हे औडुलोमे | हे औडुलोमी | हे उडुलोमाः |
| द्वि. | औडुलोमिम् | औडुलोमी | उडुलोमान् |

इत्यादि एकवचन-द्विवचनयोः 'हरि' शब्दवत्,
बहुवचने 'राम' शब्दवच्च रूपाणि ॥

---

१५७. ईकारान्तः पुंलिङ्गः 'सुधी' शब्दः (Wise)

| | | | |
|---|---|---|---|
| प्र. | सुधीः | सुधियौ | सुधियः |
| सं प्र. | हे सुधीः | हे सुधियौ | हे सुधियः |
| द्वि | सुधियम् | सुधियौ | सुधियः |
| तृ. | सुधिया | सुधीभ्यां | सुधीभिः |

| | | | |
|---|---|---|---|
| च. | सुधिये | सुधीभ्यां | सुधीभ्यः |
| प. | सुधियः | सुधीभ्यां | सुधीभ्यः |
| ष. | सुधियः | सुधियोः | सुधियाम् |
| स. | सुधियि | सुधियोः | सुधीषु |

एवं शुद्धधी, सुश्री प्रभृतयः । केवलः 'नी' शब्दोऽप्येवम् । किन्तु तस्य सप्तम्येकवचने 'नियाम्' इति रूपम् ॥

---

१५८. ईकारान्तः पुंलिङ्गः 'सेनानी' शब्दः (Commander)

| | | | |
|---|---|---|---|
| प्र. | सेनानीः | सेनान्यौ | सेनान्यः |
| सं प्र. | हे सेनानीः | हे सेनान्यौ | हे सेनान्यः |
| द्वि. | सेनान्यम् | सेनान्यौ | सेनान्यः |
| तृ. | सेनान्या | सेनानीभ्यां | सेनानीभिः |
| च. | सेनान्ये | सेनानीभ्यां | सेनानीभ्यः |
| प. | सेनान्यः | सेनानीभ्यां | सेनानीभ्यः |
| ष. | सेनान्यः | सेनान्योः | सेनान्याम् |
| स. | सेनान्याम् | सेनान्योः | सेनानीषु |

एवं ग्रामणी प्रभृतयः ॥

---

१५९. ईकारान्तः पुंलिङ्गः 'प्रधी' शब्दः

प्रकृष्टं ध्यायतीति विग्रहः (One who deeply thinks)

सेनानी शब्दवत ; किन्तु सप्तम्येकवचने 'प्रध्यि' इति रूपम् ॥

---

१६०. ईकारान्तः पुंलिङ्गः 'प्रधी' शब्दः (Very Intelligent)

(प्रकृष्टा धीः यस्य इति विग्रहः)

| | | | |
|---|---|---|---|
| प्र. | प्रधीः | प्रध्यौ | प्रध्यः |
| सं प्र. | हे प्रधि | हे प्रध्यौ | हे प्रध्यः |
| द्वि. | प्रध्यम् | प्रध्यौ | प्रध्यः |
| तृ. | प्रध्या | प्रधीभ्यां | प्रधीभिः |
| च. | प्रध्यै | प्रधीभ्यां | प्रधीभ्यः |
| प. | प्रध्याः | प्रधीभ्यां | प्रधीभ्यः |
| ष. | प्रध्याः | प्रध्योः | प्रधीनाम् |
| स. | प्रध्याम् | प्रध्योः | प्रधीषु |

बहुश्रेयसी शब्दोऽप्येवमेव । किन्तु तस्य प्रथमैकवचने 'बहुश्रेयसी' इति विसर्गरहितं रूपम् ॥

---

१६१. ईकारान्तः पुंलिङ्गः 'वातप्रमी' शब्दः

(A swift antelope)

| | | | |
|---|---|---|---|
| प्र. | वातप्रमीः | वातप्रम्यौ | वातप्रम्यः |
| सं प्र. | हे वातप्रमीः | हे वातप्रम्यौ | हे वातप्रम्यः |
| द्वि. | वातप्रमीम् | वातप्रम्यौ | वातप्रमीन् |
| तृ. | वातप्रम्या | वातप्रमीभ्यां | वातप्रमीभिः |
| च. | वातप्रम्ये | वातप्रमीभ्यां | वातप्रमीभ्यः |
| प. | वातप्रम्यः | वातप्रमीभ्यां | वातप्रमीभ्यः |
| ष. | वातप्रम्यः | वातप्रम्योः | वातप्रम्याम् |
| स. | वातप्रमी | वातप्रम्योः | वातप्रमीषु |

---

१६०. ईकारान्तः पुंलिङ्गः 'प्रधी' शब्दः (Very Intelligent)

(प्रकृष्टा धीः यस्य इति विग्रहः)

| | | | |
|---|---|---|---|
| प्र. | प्रधीः | प्रध्यौ | प्रध्यः |
| सं प्र. | हे प्रधि | हे प्रध्यौ | हे प्रध्यः |
| द्वि. | प्रध्यम् | प्रध्यौ | प्रध्यः |
| तृ. | प्रध्या | प्रधीभ्यां | प्रधीभिः |
| च. | प्रध्यै | प्रधीभ्यां | प्रधीभ्यः |
| प. | प्रध्याः | प्रधीभ्यां | प्रधीभ्यः |
| ष. | प्रध्याः | प्रध्योः | प्रधीनाम् |
| स. | प्रध्याम् | प्रध्योः | प्रधीषु |

बहुश्रेयसी शब्दोऽप्येवमेव । किन्तु तस्य प्रथमैकवचने 'बहुश्रेयसी' इति विसर्गरहितं रूपम् ॥

---

१६१. ईकारान्तः पुंलिङ्गः 'वातप्रमी' शब्दः

(A swift antelope)

| | | | |
|---|---|---|---|
| प्र. | वातप्रमीः | वातप्रम्यौ | वातप्रम्यः |
| सं प्र. | हे वातप्रमीः | हे वातप्रम्यौ | हे वातप्रम्यः |
| द्वि. | वातप्रमीम् | वातप्रम्यौ | वातप्रमीन् |
| तृ. | वातप्रम्या | वातप्रमीभ्यां | वातप्रमीभिः |
| च. | वातप्रम्ये | वातप्रमीभ्यां | वातप्रमीभ्यः |
| प. | वातप्रम्यः | वातप्रमीभ्यां | वातप्रमीभ्यः |
| ष. | वातप्रम्यः | वातप्रम्योः | वातप्रम्याम् |
| स. | वातप्रमी | वातप्रम्योः | वातप्रमीषु |

१६२. उकारान्तः पुंलिङ्गः '**क्रोष्टु**' शब्दः (Jackal)

| | | | |
|---|---|---|---|
| प्र. | क्रोष्टा | क्रोष्टारौ | क्रोष्टारः |
| सं प्र. | हे क्रोष्टो | हे क्रोष्टारौ | हे क्रोष्टारः |
| द्वि. | क्रोष्टारम् | क्रोष्टारौ | क्रोष्टून् |
| तृ. | क्रोष्ट्रा–क्रोष्टुना | क्रोष्टुभ्यां | क्रोष्टुभिः |
| च. | क्रोष्ट्रे–क्रोष्टवे, | क्रोष्टुभ्यां | क्रोष्टुभ्यः |
| प. | क्रोष्टुः–क्रोष्टोः, | क्रोष्टुभ्यां | क्रोष्टुभ्यः |
| ष. | क्रोष्टुः–क्रोष्टोः, | क्रोष्ट्रोः–क्रोष्ट्वोः, | क्रोष्टूनाम् |
| स. | क्रोष्टरि–क्रोष्टौ, | क्रोष्ट्रोः–क्रोष्ट्वोः, | क्रोष्टुषु |

---

१६३. ऊकारान्तः पुंलिङ्गः '**वर्षाभू**' शब्दः (Frog)

| | | | |
|---|---|---|---|
| प्र. | वर्षाभूः | वर्षाभ्वौ | वर्षाभ्वः |
| सं प्र. | हे वर्षाभूः | हे वर्षाभ्वौ | हे वर्षाभ्वः |
| द्वि. | वर्षाभ्वम् | वर्षाभ्वौ | वर्षाभ्वः |
| तृ. | वर्षाभ्वा | वर्षाभूभ्यां | वर्षाभूभिः |
| च. | वर्षाभ्वे | वर्षाभूभ्यां | वर्षाभूभ्यः |
| प. | वर्षाभ्वः | वर्षाभूभ्यां | वर्षाभूभ्यः |
| ष. | वर्षाभ्वः | वर्षाभ्वोः | वर्षाभ्वाम् |
| स. | वर्षाभ्वि | वर्षाभ्वोः | वर्षाभूषु |

एवं पुनर्भू, खलपू प्रभृतयः ॥

---

१६४. ऊकारान्तः पुंलिङ्गः 'स्वभू' शब्दः (Vishnu)

| | | | |
|---|---|---|---|
| प्र. | स्वभूः | स्वभुवौ | स्वभुवः |
| सं प्र. | हे स्वभूः | हे स्वभुवौ | हे स्वभुवः |
| द्वि. | स्वभुवम् | स्वभुवौ | स्वभुवः |
| तृ. | स्वभुवा | स्वभूभ्यां | स्वभूभिः |
| च. | स्वभुवे | स्वभूभ्यां | स्वभूभ्यः |
| प. | स्वभुवः | स्वभूभ्यां | स्वभूभ्यः |
| ष. | स्वभुवः | स्वभुवोः | स्वभुवाम् |
| स. | स्वभुवि | स्वभुवोः | स्वभूषु |

एवं स्वयंभू प्रभृतयः ॥

---

१६५. ऊकारान्तः पुंलिङ्गः 'हूहू' शब्दः (Name of a गन्धर्व)

| | | | |
|---|---|---|---|
| प्र. | हूहूः | हूह्वौ | हूह्वः |
| सं. प्र. | हे हूहूः | हे हूह्वौ | हे हूह्वः |
| द्वि. | हूहूम् | हूह्वौ | हूहून् |
| तृ. | हूह्वा | हूहूभ्यां | हूहूभिः |
| च. | हूह्वे | हूहूभ्यां | हूहूभ्यः |
| प. | हूह्वः | हूहूभ्यां | हूहूभ्यः |
| ष. | हूह्वः | हूह्वोः | हूह्वाम् |
| स. | हूह्वि | हूह्वोः | हूहूषु |

॥ इति अजन्तपुंलिङ्ग विशेषशब्द प्रकरणम् ॥

## अजन्त स्त्रीलिङ्ग विशेषशब्द प्रकरणम्

—:o:—

१६६. आकारान्तः स्त्रीलिङ्गः 'जरा' *शब्दः (Old age)

| | | | |
|---|---|---|---|
| प्र. | जरा | जरे-जरसौ | जराः-जरसः |
| सं. प्र. | हे जरे | हे जरे-हे जरसौ | हे जराः-हे जरसः |
| द्वि. | जराम्-जरसम्, | जरे-जरसौ | जराः-जरसः |
| तृ. | जरया-जरसा, | जराभ्यां | जराभिः |
| च. | जरायै-जरसे, | जराभ्यां | जराभ्यः |
| प. | जरायाः-जरसः | जराभ्यां | जराभ्यः |
| ष. | जरायाः-जरसः, | जरयोः-जरसोः, | जराणां-जरसाम् |
| स. | जरायां-जरसि, | जरयोः-जरसोः | जरासु |

## अजन्त नपुंसकलिङ्ग विशेषशब्द प्रकरणम्

१६७. अकारान्तः नपुंसकलिङ्गः 'अजर' शब्दः
(Not subject to old age)

| | | | |
|---|---|---|---|
| प्र. | अजरम् | अजरे-अजरसी | अजराणि-अजरांसि |
| सं. प्र. | हे अजर | हे अजरे<br>हे अजरसी | हे अजराणि<br>हे अजरांसि |
| द्वि. | अजरम् | अजरे-अजरसी | अजराणि-अजरांसि |

शेषं निर्जरशब्दवत्

—:o:—

*See foot-note on page 87.

नपुंसके 'दीर्घाणां ह्रस्वविधानात्' आकारादिदीर्घान्ताः शब्दाः न विद्यन्ते। तथापि-आकारान्तः 'विश्वपा' शब्दः 'विश्वप' इति रूपं लभते। तस्य 'फल' शब्दवत् रूपम्। एवं प्रधी-सुधी इत्यादयः 'प्रधि' 'सुधि' इत्येवं ह्रस्वान्ता भवन्ति।

---

## हलन्त पुंलिङ्ग विशेषशब्द प्रकरणम्

---

१६८. चकारान्तः पुंलिङ्गः 'प्राञ्च्' शब्दः (Eastern)

| | | | |
|---|---|---|---|
| प्र. | *प्राङ् | प्राञ्चौ | प्राञ्चः |
| सं प्र. | हे प्राङ् | हे प्राञ्चौ | हे प्राञ्चः |
| द्वि. | प्राञ्चम् | प्राञ्चौ | प्राचः |
| तृ. | प्राचा | प्राग्भ्यां | प्राग्भिः |
| च. | प्राचे | प्राग्भ्यां | प्राग्भ्यः |
| प. | प्राचः | प्राग्भ्यां | प्राग्भ्यः |
| ष. | प्राचः | प्राचोः | प्राचाम् |
| स. | प्राचि | प्राचोः | प्राक्षु |

एवं पराञ्च्, अवाञ्च् प्रभृतयः॥

---

* 'प्राञ्च्' प्रभृतयः पञ्च शब्दाः स्त्रीलिङ्गे—प्राची, प्रतीची, उदीची, अनूची तिरश्ची इति ईकारान्ता भवन्ति। तेषां नदी शब्दवत् रूपाणि॥

१६९. चकारान्तः पुंलिङ्गः 'प्रत्यञ्च्' शब्दः (Western)

| | | | |
|---|---|---|---|
| प्र. | प्रत्यङ् | प्रत्यञ्चौ | प्रत्यञ्चः |
| सं. प्र. | हे प्रत्यङ् | हे प्रत्यञ्चौ | हे प्रत्यञ्चः |
| द्वि. | प्रत्यञ्चम् | प्रत्यञ्चौ | प्रतीचः |
| तृ. | प्रतीचा | प्रत्यग्भ्यां | प्रत्यग्भिः |
| च. | प्रतीचे | प्रत्यग्भ्यां | प्रत्यग्भ्यः |
| प. | प्रतीचः | प्रत्यग्भ्यां | प्रत्यग्भ्यः |
| ष. | प्रतीचः | प्रतीचोः | प्रतीचाम् |
| स. | प्रतीचि | प्रतीचोः | प्रत्यक्षु |

एवं न्यञ्च्, सम्यञ्च् प्रभृतयः ॥

---

१७०. चकारान्तः पुंलिङ्गः 'उदञ्च्' शब्दः (Northern)

| | | | |
|---|---|---|---|
| प्र. | उदङ् | उदञ्चौ | उदञ्चः |
| सं. प्र. | हे उदङ् | हे उदञ्चौ | हे उदञ्चः |
| द्वि. | उदञ्चम् | उदञ्चौ | उदीचः |
| तृ. | उदीचा | उदग्भ्यां | उदग्भिः |

शेषं 'प्रत्यञ्च्' शब्दवत्

---

१७१. चकारान्तः पुंलिङ्गः 'अन्वञ्च्' शब्दः (Following)

| | | | |
|---|---|---|---|
| प्र. | अन्वङ् | अन्वञ्चौ | अन्वञ्चः |
| सं प्र. | हे अन्वङ् | हे अन्वञ्चौ | हे अन्वञ्चः |

| | | | |
|---|---|---|---|
| द्वि. | अन्वञ्चम् | अन्वञ्चौ | अनूचः |
| तृ. | अनूचा | अन्वग्भ्यां | अन्वग्भिः |
| च. | अनूचे | अन्वग्भ्यां | अन्वग्भ्यः |
| प. | अनूचः | अन्वग्भ्यां | अन्वग्भ्यः |
| ष. | अनूचः | अनूचोः | अनूचाम् |
| स. | अनूचि | अनूचोः | अन्वक्षु |

१७२. चकारान्तः पुंलिङ्गः 'तिर्यञ्च्' शब्दः
(Going horizontally)

| | | | |
|---|---|---|---|
| प्र. | तिर्यङ् | तिर्यञ्चौ | तिर्यञ्चः |
| सं. प्र. | हे तिर्यङ् | हे तिर्यञ्चौ | हे तिर्यञ्चः |
| द्वि. | तिर्यञ्चम् | तिर्यञ्चौ | तिरश्चः |
| तृ. | तिरश्चा | तिर्यग्भ्यां | तिर्यग्भिः |
| च. | तिरश्चे | तिर्यग्भ्यां | तिर्यग्भ्यः |
| प. | तिरश्चः | तिर्यग्भ्यां | तिर्यग्भ्यः |
| ष. | तिरश्चः | तिरश्चोः | तिरश्चाम् |
| स. | तिरश्चि | तिरश्चोः | तिर्यक्षु |

---

१७३. जकारान्तः पुंलिङ्गः 'विभ्राज्' शब्दः (Bright)

| | | | |
|---|---|---|---|
| प्र. | विभ्राट्–विभ्राक् | विभ्राजौ | विभ्राजः |
| सं प्र. | हे विभ्राट्–हे विभ्राक् | हे विभ्राजौ | हे विभ्राजः |

शेषं 'राज्' शब्दवत्

---

१७४. जकारान्तः पुंलिङ्गः 'युज्'[1] शब्दः (Sage)

| | | | |
|---|---|---|---|
| प्र. | युक् | युजौ | युजः |
| सं प्र. | हे युक् | हे युजौ | हे युजः |
| द्वि. | युजम् | युजौ | युजः |
| तृ. | युजा | युग्भ्यां | युग्भिः |
| च. | युजे | युग्भ्यां | युग्भ्यः |
| पं. | युजः | युग्भ्यां | युग्भ्यः |
| ष. | युजः | युजोः | युजाम् |
| स. | युजि | युजोः | युक्षु |

१७५. जकारान्तः पुंलिङ्गः 'युञ्ज्'[2] शब्दः (United with)

| | | | |
|---|---|---|---|
| प्र. | युङ् | युञ्जौ | युञ्जः |
| सं प्र | हे युङ् | हे युञ्जौ | हे युञ्जः |
| द्वि. | युञ्जम् | युञ्जौ | युजः |

शेषं 'युज्' शब्दवत्

१७६. जकारान्तः पुंलिङ्गः 'विश्वराज्' शब्दः (Universal sovereign)

| | | | |
|---|---|---|---|
| प्र. | विश्वराट् | विश्वराजौ | विश्वराजः |

1. इदं 'युज् समाधौ' इत्यस्मात् धातोः निष्पन्नं रूपम् ।
2. इदं युजिर् 'योगे' इत्यस्मात् धातोः निष्पन्नं रूपम् ॥

| | | | |
|---|---|---|---|
| सं. प्र. | हे विश्वराट् | हे विश्वराजौ | हे विश्वराजः |
| द्वि. | विश्वराजम् | विश्वराजौ | विश्वराजः |
| तृ. | विश्वराजा | विश्वाराड्भ्यां | विश्वाराड्भिः |
| च. | विश्वराजे | विश्वाराड्भ्यां | विश्वाराड्भ्यः |
| प. | विश्वराजः | विश्वाराड्भ्यां | विश्वाराड्भ्यः |
| ष. | विश्वराजः | विश्वराजोः | विश्वराजाम् |
| स. | विश्वराजि | विश्वराजोः | विश्वाराट्सु |

१७७. दकारान्तः पुंलिङ्गः 'सुपाद्' शब्दः
(Having good feet)

| | | | |
|---|---|---|---|
| प्र. | सुपात् | सुपादौ | सुपादः |
| सं. प्र. | हे सुपात् | हे सुपादौ | हे सुपादः |
| द्वि. | सुपादम् | सुपादौ | सुपादः |
| तृ. | सुपदा | सुपाद्भ्यां | सुपाद्भिः |
| च. | सुपदे | सुपाद्भ्यां | सुपाद्भ्यः |
| प. | सुपदः | सुपाद्भ्यां | सुपाद्भ्यः |
| ष. | सुपदः | सुपदोः | सुपदाम् |
| स. | सुपदि | सुपदोः | सुपात्सु |

एवं द्विपाद्, व्याघ्रपाद् प्रभृतयः

१७८. नकारान्तः पुंलिङ्गः 'पूषन्' शब्दः (सूर्यः)

| | | | |
|---|---|---|---|
| प्र. | पूषा | पूषणौ | पूषणः |

| | | | |
|---|---|---|---|
| सं प्र. | हे पूषन् | हे पूषणौ | हे पूषणः |
| द्वि. | पूषणम् | पूषणौ | पूष्णः |

शेषं 'राजन्' शब्दवत्। एवम् अर्यमन् शब्दः

---

१७९. नकारान्तः पुंलिङ्गः * 'वृत्रहन्' शब्दः (इन्द्रः)

| | | | |
|---|---|---|---|
| प्र. | वृत्रहा | वृत्रहणौ | वृत्रहणः |
| सं प्र. | हे वृत्रहन् | हे वृत्रहणौ | हे वृत्रहणः |
| द्वि. | वृत्रहणम् | वृत्रहणौ | वृत्रघ्नः |
| तृ. | वृत्रघ्ना | वृत्रहभ्यां | वृत्रहभिः |
| च. | वृत्रघ्ने | वृत्रहभ्यां | वृत्रहभ्यः |
| प. | वृत्रघ्नः | वृत्रहभ्यां | वृत्रहभ्यः |
| ष. | वृत्रघ्नः | वृत्रघ्नोः | वृत्रघ्नाम् |
| स. | वृत्रघ्नि–वृत्रहणि, | वृत्रघ्नोः | वृत्रहसु |

एवं ब्रह्महन्, आत्महन् प्रभृतयः ॥

---

१८०. नकारान्तः पुंलिङ्गः 'दीर्घाहन्' शब्दः (Summer)

| | | | |
|---|---|---|---|
| प्र. | दीर्घाहाः | दीर्घाहाणौ | दीर्घाहाणः |
| सं. प्र. | हे दीर्घाहाः | हे दीर्घाहाणौ | हे दीर्घाहाणः |
| द्वि. | दीर्घाहाणम् | दीर्घाहाणौ | दीर्घाह्नः |
| तृ. | दीर्घाह्ना | दीर्घाहोभ्यां | दीर्घाहोभिः |

| | | | |
|---|---|---|---|
| च. | दीर्घाह्ने | दीर्घाहोभ्यां | दीर्घाहोभ्यः |
| प. | दीर्घाह्नः | दीर्घाहोभ्यां | दीर्घाहोभ्यः |
| ष. | दीर्घाह्नः | दीर्घाह्नोः | दीर्घाह्नाम् |
| स. | दीर्घाह्नि-दीर्घाहणि, | दीर्घाह्नोः | दीर्घाहस्सु |

---

१८१. नकारान्तः पुंलिङ्गः 'अर्वन्' शब्दः (Horse)

| | | | |
|---|---|---|---|
| प्र. | अर्वा | अर्वन्तौ | अर्वन्तः |

शेषं 'धीमत्' शब्दवत् ॥

---

१८२. नकारान्तः पुंलिङ्गः 'अनर्वन्' शब्दः (Having no horse)

'आत्मन्' शब्दवत् ॥

---

१८३. नकारान्तः पुंलिङ्गः 'ऋभुक्षिन्' शब्दः (इन्द्रः)

| | | | |
|---|---|---|---|
| प्र. | ऋभुक्षाः | ऋभुक्षाणौ | ऋभुक्षाणः |
| सं प्र. | हे ऋभुक्षाः | हे ऋभुक्षाणौ | हे ऋभुक्षाणः |
| द्वि. | ऋभुक्षाणम् | ऋभुक्षाणौ | ऋभुक्षः |
| तृ. | ऋभुक्षा | ऋभुक्षिभ्यां | ऋभुक्षिभिः |
| च. | ऋभुक्षे | ऋभुक्षिभ्यां | ऋभुक्षिभ्यः |
| प. | ऋभुक्षः | ऋभुक्षिभ्यां | ऋभुक्षिभ्यः |
| ष. | ऋभुक्षः | ऋभुक्षोः | ऋभुक्षाम् |
| स. | ऋभुक्षि | ऋभुक्षोः | ऋभुक्षिषु |

---

१८४. सकारान्तः पुंलिङ्गः 'उशनस्' शब्दः (शुक्राचार्यः)

| | | | |
|---|---|---|---|
| प्र. | उशना | उशनसौ | उशनसः |
| सं. | हे उशनन्<br>हे उशनः<br>हे उशन | हे उशनसौ | हे उशनसः |

शेषं 'वेधस्' शब्दवत्

---

१८५. सकारान्तः पुंलिङ्गः 'अनेहस्' शब्दः (Time)

| | | | |
|---|---|---|---|
| प्र. | अनेहा | अनेहसौ | अनेहसः |

शेषं 'वेधस्' शब्दवत्

---

१८६. हकारान्तः पुंलिङ्गः 'विश्ववाह्' शब्दः
(Sustainer of the universe)

| | | | |
|---|---|---|---|
| प्र. | विश्ववाट् | विश्ववाहौ | विश्ववाहः |
| सं. प्र. | हे विश्ववाट् | हे विश्ववाहौ | हे विश्ववाहः |
| द्वि. | विश्ववाहम् | विश्ववाहौ | विश्वौहः |
| तृ. | विश्वौहा | विश्ववाड्भ्यां | विश्ववाड्भिः |
| च. | विश्वौहे | विश्ववाड्भ्यां | विश्ववाड्भ्यः |
| प. | विश्वौहः | विश्ववाड्भ्यां | विश्ववाड्भ्यः |
| ष. | विश्वौहः | विश्वौहोः | विश्वौहाम् |
| स. | विश्वौहि | विश्वौहोः | विश्ववाट्सु |

एवं हव्यवाह्, भारवाह् प्रभृतयः

---

१८७. हकारान्तः पुंलिङ्गः 'तुरासाह्' शब्दः (इन्द्रः)

| | | | |
|---|---|---|---|
| प्र. | तुराषाट् | तुरासाहौ | तुरासाहः |
| सं. प्र. | हे तुराषाट् | हे तुरासाहौ | हे तुरासाहः |
| द्वि. | तुरासाहम् | तुरासाहौ | तुरासाहः |
| तृ. | तुरासाहा | तुराषाड्भ्यां | तुराषाड्भिः |
| च. | तुरासाहे | तुराषाड्भ्यां | तुराषाड्भ्यः |
| प. | तुरासाहः | तुराषाड्भ्यां | तुराषाड्भ्यः |
| ष. | तुरासाहः | तुरासाहोः | तुरासाहाम् |
| स. | तुरासाहि | तुरासाहोः | तुराषाट्सु |

---

१८८. हकारान्तः पुंलिङ्गः 'दुह्' शब्दः (One who milks)

| | | | |
|---|---|---|---|
| प्र. | धुक् | दुहौ | दुहः |
| सं. प्र. | हे धुक् | हे दुहौ | हे दुहः |
| द्वि. | दुहम् | दुहौ | दुहः |
| तृ. | दुहा | धुग्भ्यां | धुग्भिः |
| च. | दुहे | धुग्भ्यां | धुग्भ्यः |
| प. | दुहः | धुग्भ्यां | धुग्भ्यः |
| ष. | दुहः | दुहोः | दुहाम् |
| स. | दुहि | दुहोः | धुक्षु |

एवं दह्, दिह् प्रभृतयः ॥

---

१८९. हकारान्तः पुंलिङ्गः 'द्रुह्' शब्दः
(One who bears hatred)

| | | | |
|---|---|---|---|
| प्र. | ध्रुक्—ध्रुट्, | द्रुहौ | द्रुहः |
| सं. प्र. | हे ध्रुक्-हे ध्रुट्, | हे द्रुहौ | हे द्रुहः |
| द्वि. | द्रुहम् | द्रुहौ | द्रुहः |
| तृ. | द्रुहा | ध्रुग्भ्यां ध्रुड्भ्यां | ध्रुग्भिः-ध्रुड्भिः |
| च. | द्रुहे | ध्रुग्भ्यां-ध्रुड्भ्यां | ध्रुग्भ्यः-ध्रुड्भ्यः |
| प. | द्रुहः | ध्रुग्भ्यां-ध्रुड्भ्यां, | ध्रुग्भ्यः-ध्रुड्भ्यः |
| ष. | द्रुहः | द्रुहोः | द्रुहाम् |
| स. | द्रुहि | द्रुहोः | ध्रुक्षु-ध्रुट्सु |

एवं मुह्, स्नुह्, स्निह् शब्दाः

---

१९०. हकारान्तः पुंलिङ्गः 'अनडुह्' शब्दः (Ox)

| | | | |
|---|---|---|---|
| प्र. | अनड्वान् | अनड्वाहौ | अनड्वाहः |
| सं प्र. | हे अनड्वान् | हे अनड्वाहौ | हे अनड्वाहः |
| द्वि. | अनड्वाहम् | अनड्वाहौ | अनडुहः |
| तृ. | अनडुहा | अनडुद्भ्यां | अनडुद्भिः |
| च. | अनडुहे | अनडुद्भ्यां | अनडुद्भ्यः |
| प. | अनडुहः | अनडुद्भ्यां | अनडुद्भ्यः |
| ष. | अनडुहः | अनडुहोः | अनडुहाम् |
| स. | अनडुहि | अनडुहोः | अनडुत्सु |

॥ इति हलन्तपुंलिङ्ग विशेषशब्दाः ॥

---

# हलन्त स्त्रीलिङ्ग विशेषशब्द प्रकरणम्

१९१. रेफान्तः स्त्रीलिङ्गः "द्वार्" शब्दः (A door)

| | | | |
|---|---|---|---|
| प्र. | द्वाः | द्वारौ | द्वारः |
| सं. प्र. | हे द्वाः | हे द्वारौ | हे द्वारः |
| द्वि. | द्वारम् | द्वारौ | द्वारः |
| तृ. | द्वारा | द्वार्भ्यां | द्वार्भिः |
| च. | द्वारे | द्वार्भ्यां | द्वार्भ्यः |
| प. | द्वारः | द्वार्भ्यां | द्वार्भ्यः |
| ष. | द्वारः | द्वारोः | द्वाराम् |
| स. | द्वारि | द्वारोः | द्वार्षु |

१९२. सकारान्तः स्त्रीलिङ्गः 'अर्चिस्' शब्दः (Flame)[1]

| | | | |
|---|---|---|---|
| प्र. | अर्चिः | अर्चिषौ | अर्चिषः |
| सं. प्र. | हे अर्चिः | हे अर्चिषौ | हे अर्चिषः |
| द्वि. | अर्चिषम् | अर्चिषौ | अर्चिषः |
| तृ. | अर्चिषा | अर्चिर्भ्यां | अर्चिर्भिः |
| च. | अर्चिषे | अर्चिर्भ्यां | अर्चिर्भ्यः |
| प. | अर्चिषः | अर्चिर्भ्यां | अर्चिर्भ्यः |
| ष. | अर्चिषः | अर्चिषोः | अर्चिषाम् |
| स. | अर्चिषि | अर्चिषोः | अर्चिःषु |

1. अयं नपुंसकलिङ्गेऽपि दृश्यते। तस्य रूपं तु 'हविस्' शब्दवत्॥

१९३. षकारान्तः स्त्रीलिङ्गः 'सजुष्' शब्दः (Companion)

| | | | |
|---|---|---|---|
| प्र. | सजूः | सजुषौ | सजुषः |
| सं. प्र. | हे सजूः | हे सजुषौ | हे सजुषः |
| द्वि. | सजुषम् | सजुषौ | सजुषः |
| तृ. | सजुषा | सजूर्भ्यां | सजूर्भिः |
| च. | सजुषे | सजूर्भ्यां | सजूर्भ्यः |
| प. | सजुषः | सजूर्भ्यां | सजूर्भ्यः |
| ष. | सजुषः | सजुषोः | सजुषाम् |
| स. | सजुषि | सजुषोः | सजूःषु |

१९४. हकारान्तः स्त्रीलिङ्गः 'उष्णिह्' शब्दः

(A kind of metre—छन्दस्)

| | | | |
|---|---|---|---|
| प्र. | उष्णिक् | उष्णिहौ | उष्णिहः |
| सं. प्र. | हे उष्णिक् | हे उष्णिहौ | हे उष्णिहः |
| द्वि. | उष्णिहम् | उष्णिहौ | उष्णिहः |
| तृ. | उष्णिहा | उष्णिग्भ्यां | उष्णिग्भिः |
| च. | उष्णिहे | उष्णिग्भ्यां | उष्णिग्भ्यः |
| प. | उष्णिहः | उष्णिग्भ्यां | उष्णिग्भ्यः |
| ष. | उष्णिहः | उष्णिहोः | उष्णिहाम् |
| स. | उष्णिहि | उष्णिहोः | उष्णिक्षु |

॥ इति हलन्त स्त्रीलिङ्ग विशेषशब्द प्रकरणम् ॥

## हलन्त नपुंसकलिङ्ग विशेषशब्दाः

चकारान्तः नपुंसकलिङ्गः 'प्राञ्च्' शब्दः (गत्यर्थकः)

| | | | | |
|---|---|---|---|---|
| १९५. | प्र., सं. प्र., द्वि. | प्राक् | प्राची | प्राञ्चि |
| १९६. | प्र., सं. प्र., द्वि. | प्रत्यक् | प्रतीची | प्रत्यञ्चि |
| १९७. | प्र, सं. प्र., द्वि. | अन्वक् | अनूची | अन्वञ्चि |
| १९८. | प्र., सं. प्र., द्वि. | उदक् | उदीची | उदञ्चि |
| १९९. | प्र., सं. प्र., द्वि. | तिर्यक् | तिरश्ची | तिर्यञ्चि |

शेषं पुंवत्।

एवं चकारान्त नपुंसकलिङ्गः (गत्यर्थकाः)

पूजार्थकस्य अञ्चुधातोस्तु पूर्वस्मात् विशेष :—

| | | | |
|---|---|---|---|
| प्र., सं. प्र., द्वि. | प्राङ् | प्राञ्ची | प्राञ्चि |
| प्र., सं. प्र., द्वि. | प्रत्यङ् | प्रत्यञ्ची | प्रत्यञ्चि |
| प्र., सं. प्र., द्वि. | अन्वङ् | अन्वञ्ची | अन्वञ्चि |
| प्र., सं. प्र., द्वि. | उदङ् | उदञ्ची | उदञ्चि |
| प्र., सं. प्र., द्वि. | तिर्यङ् | तिर्यञ्ची | तिर्यञ्चि |

शेषं पुंवत्।

हकारान्तः नपुंसकलिङ्गाः 'दुह्' 'द्रुह्' स्वनडुह्' शब्दाः

| | | | | |
|---|---|---|---|---|
| २००. | प्र., सं. प्र., द्वि. | धुक् | दुही | दुंहि |
| २०१. | प्र., सं. प्र., द्वि. | ध्रुक्-ध्रुट्, | द्रुही | द्रुंहि |
| २०२. | प्र., सं. प्र., द्वि. | स्वनडुत् | स्वनडुही | स्वनड्वांहि |

शेषं पुंवत्।

॥ इति सुबन्त प्रकरणम् ॥

## तिङन्तप्रकरणम्-Conjugations of Verbs.

---

॥ प्रस्तावना ॥

संस्कृतभाषायां प्रायेण २२०० धातवः (Roots) सन्ति। तेषाम् एकैकस्यापि धातोः *दश लकाराः (Tenses and Moods) संभवन्ति। तेषु षट् लकाराः कालवाचकाः, (Tenses) चत्वारः प्रकारबोधकाः (Moods)। यथा—

### षट् कालवाचकाः–Six Tenses

*viz.* one Present Tense, 3 kinds of Past Tense and 2 kinds of Future Tense

**TENSES**

| | Name | Sanskrit | English | Example |
|---|---|---|---|---|
| 1. | लट् | वर्तमानः | Present | भवति |
| 2. | लङ् | अनद्यतनभूत | Past Tense, Imperfect | अभवत् |
| 3. | लुङ् | भूतः | Past Tense, Aorist | अभूत् |
| 4. | लिट् | परोक्षभूत | Past Tense, Perfect | बभूव |
| 5. | लुट् | अनद्यनभविष्यन् | First Future | भविता |
| 6. | लृट् | भविष्यन् | Second Future | भविष्यति |

---

* Besides the 10 लकारs there is one more लकार—

## चत्वारः प्रकारबोधकाः—Four Moods

| | | | |
|---|---|---|---|
| 1. लोट् | आज्ञा | Imperative | भवतु |
| 2. विधिलिङ् | विधिः | Potential | भवेत् |
| 3. आशीर्लिङ् | आशीः | Benedictive | भूयात् |
| 4. लङ् | क्रियातिपत्तिः / संकेतः | Conditional | अभविष्यत् |

एतेषाम् एकैकस्यापि लकारस्य स्थाने पृथक् पुरुषप्रत्ययाः (Personal Terminations) भवति। पुरुषाश्च त्रयः सन्ति—

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | Third Person used with | सः | etc. |
| मध्यमपुरुषः | Second Person ,, | त्वम् | |
| उत्तमपुरुषः | First Person ,, | अहम् | |

पुरुषाणां प्रत्येकं त्रीणि वचनानि विद्यन्ते।

| | | |
|---|---|---|
| एक वचनम् | Singular | एकत्वबोधकम् |
| द्वि वचनम् | Dual | द्वित्वबोधकम् |
| बहु वचनम् | Plural | बहुत्वबोधकम् |

पुरुषप्रत्यया एव 'तिङ' इत्युच्यन्ते। तिङां 'परस्मैपदम्', 'आत्मनेपदम्' इति द्वे पदे स्तः। केभ्यश्चन धातुभ्यः परस्मैपदमेव भवति, ते धातवः 'परस्मैपदिनः' इत्युच्यन्ते।

---

viz, लेट् This is used only in Vedas, and is hence termed "The Vedic Subjunctive". These technical names are given in the following कारिका—

लट् वर्तमाने-लेट् वेदे-भूते लुङ्-लङ् लिटस्तथा।
विध्याशिषास्तु लिङ्लोटौ लुट्-लृट्-लृङ् च भविष्यति॥

केभ्यश्चन आत्मनेपदमेव, ते 'आत्मनेपदिनः' इत्युच्यन्ते। केभ्यश्चन उभयमपि पदं संभवति, ते 'उभयपदिनः' इत्युच्यन्ते॥

'परस्मैपदम्' 'आत्मनेपदम्' इत्यन्वर्थे संज्ञे। तथा हि—पचनादिका क्रिया लोके परार्थ-आत्मार्था च संभवति। यत्र परस्य उपयोगाय (For another) क्रिया प्रवर्तते तत्र परस्मैपदम्; यत्र तु आत्मनः उपयोगाय (For Self) तत्र आत्मनेपदं प्रयोक्तव्यम् इति व्यवस्था। यथा—सूतः पचति—परस्मैपदम्, रामः पचते—आत्मनेपदम्।

परं तु इयं व्यवस्था अद्यत्वे नाद्रियते। परस्मैपदम्, आत्मनेपदं च निर्विशेषं प्रयुञ्जते कवयः॥

लकाराः 'सार्वधातुकाः' (Conjugational Tenses and Moods), 'आर्धधातुकाः' (Non-Conjugational Tenses and Moods) इति द्वेधा विभक्ताः। लट्, लङ्, लोट्, विधिलिङ् इत्येते चत्वारः सार्वधातुकाः। अन्ये षट्, आर्धधातुकाः। सार्वधातुकेषु लकारेषु धातूनां प्रत्ययानां च मध्ये विकरणाख्याः प्रत्ययाः संयोज्यन्ते। तथा हि 'भवति' इत्यादौ अंशत्रयमस्ति—भू+अ+ति। (१) 'भू' इति धातुः, (२) 'अ' इति विकरणप्रत्ययः, (३) 'ति' इति पुरुषप्रत्ययः॥

विकरणप्रत्ययाः दशविधाः। तेषां भेदमनुसृत्य धातवः दशसु गणेषु विभज्य पठिताः। तथा हि—

| गण | नाम | धातु, | विकरण प्रत्ययः | पुरुष-प्रत्ययः परस्मै | आत्मने | रूपाणि परस्मैपदम् | आत्मने पदम् |
|---|---|---|---|---|---|---|---|
| प्रथमः | भ्वादिः | भू | अ | ति | — | भवति | — |
| | | वन्द् | अ | — | ते | — | वन्दते |
| द्वितीयः | अदादिः | अद् | — | ति | — | अत्ति | — |
| | | अस् | — | — | ते | — | आस्ते |
| तृतीयः | जुहोत्यादिः | हु | — | ति | — | जुहोति | — |
| | | हा | — | — | ते | | जिहीते |
| चतुर्थः | दिवादिः | दिव् | य | ति | ते | दीव्यति | दीव्यते |
| पञ्चमः | स्वादिः | सु | नु | ति | ते | सुनोति | सुनुते |
| षष्ठः | तुदादिः | तुद् | अ | ति | ते | तुदति | तुदते |
| सप्तमः | रुधादिः | रुध् | न | ति | ते | रुणद्धि | रुन्धे |
| अष्टमः | तनादिः | तन् | उ | ति | ते | तनोति | तनुते |
| नवमः | क्र्यादिः | क्री | ना | ति | ते | क्रीणाति | क्रीणीते |
| दशमः | चुरादिः | चुर् | अय | ति | ते | चोरयति | चोरयते |

आर्धधातुकेषु लकारेषु विकरणनिमित्तको रूपभेदो नास्ति। किन्तु केचन धातवः 'सेटः' (स + इट् *i. e.* with इ, the augment). केचन 'अनिटः' (अन् + इट् *i. e.* without the augment इ।) यथा—भू धातुः सेट्, अतः भविता, भविष्यतीत्यादौ धातोः पुरुषप्रत्ययस्य च मध्ये 'इ' इत्येतत् श्रूयते। त्यज् धातुः अनिट्, अतः त्यक्ता, त्यक्ष्यतीत्यादौ 'इ' इत्येतन्नास्ति।

For detailed study refer to धातुरूपमञ्जरी Book

## सार्वधातुकानां लकाराणां स्थाने जायमानाः पुरुषप्रत्ययाः ॥
(Personal Terminations)

---

| परस्मैपदप्रत्ययाः | | | | | आत्मनेपदप्रत्ययाः | | |
|---|---|---|---|---|---|---|---|
| | | लट् (वर्तमानार्थकः Present Tense) | | | | | |
| प्र. | पु. | ति | तः | अन्ति | ते | इते | अन्ते |
| म. | पु. | सि | थः | थ | से | इथे | ध्वे |
| उ. | पु. | मि | वः | मः | इ | वहे | महे |
| | | (लङ् अनद्यतनभूतार्थकः) Imperfect (Past) Tense | | | | | |
| प्र. | पु. | त् | ताम् | अन् | त | इताम् | अन्त |
| म. | पु. | स् | तम् | त | थाः | इथाम् | ध्वम् |
| उ. | पु. | अम् | व | म | इ | वहि | महि |
| | | लोट् (विध्याशीः प्रार्थनार्थकः) Imperative Mood. | | | | | |
| प्र. | पु. | तु | ताम् | अन्तु | ताम् | इताम् | अन्ताम् |
| म. | पु. | — | तम् | त | स्व | इथाम् | ध्वम् |
| उ. | पु. | आनि | आव | आम | ऐ | आवहै | आमहै |
| | | विधिलिङ् (विधिप्रार्थनाद्यर्थकः) Potential Mood. | | | | | |
| प्र. | पु. | ईत् | ईताम् | ईयुः | ईत | ईयाताम् | ईरन् |
| म. | पु. | ईः | ईतम् | ईत | ईथाः | ईयाथाम् | ईध्वम् |
| उ. | पु. | ईयम् | ईव | ईम | ईय | ईवहि | ईमहि |

---

## प्रथमगणः—भ्वादिः (Ist Conjugation)

सत्तार्थकः 'भू' (भव् to be) अकर्मकः परस्मैपदी

सार्वधातुकाः प्रत्ययाः चत्वारः—४

१. लट् (वर्तमानार्थकः) Present Tense.

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति |
| मध्यमपुरुषः | भवसि | भवथः | भवथ |
| उत्तमपुरुषः | भवामि | भवावः | भवामः |

२. लङ् (अनद्यतनभूतार्थकः) Imperfect (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | अभवत् | अभवतां | अभवन् |
| म. | अभवः | अभवतं | अभवत |
| उ. | अभवं | अभवाव | अभवाम |

३. लोट् (विध्याशीःप्रार्थनार्थकः) Imperative Mood.

| | | | |
|---|---|---|---|
| प्र. | भवतु-भवतात्; | भवतां | भवन्तु |
| म. | भव-भवतात्; | भवतं | भवत |
| उ. | भवानि | भवाव | भवाम |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थकः) Potential Mood.

| | | | |
|---|---|---|---|
| प्र. | भवेत् | भवेतां | भवेयुः |
| म. | भवेः | भवेतं | भवेत |
| उ. | भवेयं | भवेव | भवेम |

S—8

## आर्धधातुकाः प्रत्ययाः षट् — ६

### १. लुट् (अनद्यतनभविष्यदर्थकः) First Future Tense.

| | | | |
|---|---|---|---|
| प्र. | भविता | भवितारौ | भवितारः |
| म. | भवितासि | भवितास्थः | भवितास्थ |
| उ. | भवितास्मि | भवितास्वः | भवितास्मः |

### २. लृट् (भविष्यदर्थकः) Second Future Tense.

| | | | |
|---|---|---|---|
| प्र. | भविष्यति | भविष्यतः | भविष्यन्ति |
| म. | भविष्यसि | भविष्यथः | भविष्यथ |
| उ. | भविष्यामि | भविष्यावः | भविष्यामः |

### लृङ् (भूते भाविनि च क्रियायां अनिष्पत्तौ अर्थे) Conditional Mood.

| | | | |
|---|---|---|---|
| प्र. | अभविष्यत् | अभविष्यतां | अभविष्यन् |
| म. | अभविष्यः | अभविष्यतं | अभविष्यत |
| उ. | अभविष्यं | अभविष्याव | अभविष्याम |

### ४. लिट् (भूतानद्यतनपरोक्षक्रियार्थः) Perfect (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | बभूव | बभूवतुः | बभूवुः |
| म. | बभूविथ | बभूवथुः | बभूव |
| उ. | बभूव | बभूविव | बभूविम |

### ५. (लुङ् भूतार्थकः) Aorist (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | अभूत् | अभूतां | अभूवन् |
| म. | अभूः | अभूतं | अभूत |
| उ. | अभूवं | अभूव | अभूम |

६. आशीर्लिङ् (आशीरर्थकः) Benedictive Mood.

| | | | |
|---|---|---|---|
| प्र. | भूयात् | भूयास्ताम् | भूयासुः |
| म. | भूयाः | भूयास्तम् | भूयास्त |
| उ. | भूयासम् | भूयास्व | भूयास्म |

'वन्द्' अभिवादने (to bow) सकर्मकः—आत्मनेपदी

सार्वधातुकाः प्रत्ययाः चत्वारः—४

१. लट्—Present Tense.

| | | | |
|---|---|---|---|
| प्र. | वन्दते | वन्देते | वन्दन्ते |
| म. | वन्दसे | वन्देथे | वन्दध्वे |
| उ. | वन्दे | वन्दावहे | वन्दामहे |

२. लङ्—Imperfect (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | अवन्दत | अवन्देताम् | अवन्दन्त |
| म. | अवन्दथाः | अवन्देथाम् | अवन्दध्वम् |
| उ. | अवन्दे | अवन्दावहि | अवन्दामहि |

३. लोट्—Imperative Mood.

| | | | |
|---|---|---|---|
| प्र. | वन्दताम् | वन्देताम् | वन्दन्ताम् |
| म. | वन्दस्व | वन्देथाम् | वन्दध्वम् |
| उ. | वन्दै | वन्दावहै | वन्दामहै |

४. विधिलिङ्—Potential Mood.

| | | | |
|---|---|---|---|
| प्र. | वन्देत | वन्देयाताम् | वन्देरन् |
| म. | वन्देथाः | वन्देयाथाम् | वन्देध्वम् |
| उ. | वन्देय | वन्देवहि | वन्देमहि |

## आर्धधातुकाः प्रत्ययाः षट्—६

### १. लुट्—First Future Tense.

| | | | |
|---|---|---|---|
| प्र. | वन्दिता | वन्दितारौ | वन्दितारः |
| म. | वन्दितासे | वन्दितासाथे | वन्दिताध्वे |
| उ. | वन्दिताहे | वन्दितास्वहे | वन्दितास्महे |

### २. लृट्—Second Future Tense.

| | | | |
|---|---|---|---|
| प्र. | वन्दिष्यते | वन्दिष्येते | वन्दिष्यन्ते |
| म. | वन्दिष्यसे | वन्दिष्येथे | वन्दिष्यध्वे |
| उ. | वन्दिष्ये | वन्दिष्यावहे | वन्दिष्यामहे |

### ३. लृङ्—Conditional Mood.

| | | | |
|---|---|---|---|
| प्र. | अवन्दिष्यत | अवन्दिष्येताम् | अवन्दिष्यन्त |
| म. | अवन्दिष्यथाः | अवन्दिष्येथाम् | अवन्दिष्यध्वम् |
| उ. | अवन्दिष्ये | अवन्दिष्यावहि | अवन्दिष्यामहि |

### ४. लिट्—Perfect (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | ववन्दे | ववन्दाते | ववन्दिरे |
| म. | ववन्दिषे | ववन्दाथे | ववन्दिध्वे |
| उ. | ववन्दे | ववन्दिवहे | ववन्दिमहे |

### ५. लुङ्—Aorist (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | अवन्दिष्ट | अवन्दिषाताम् | अवन्दिषत |
| म. | अवन्दिष्ठाः | अवन्दिषाथाम् | अवन्दिढ्वम् |
| उ. | अवन्दिषि | अवन्दिष्वहि | अवन्दिष्महि |

६. आशीर्लिङ्—Benedictive Mood

| | | | |
|---|---|---|---|
| प्र. | वन्दिषीष्ट | वन्दिषीयास्ताम् | वन्दिषीरन् |
| म. | वन्दिषीष्ठाः | वन्दिषीयास्थाम् | वन्दिषीध्वम् |
| उ. | वन्दिषीय | वन्दिषीवहि | वन्दिषीमहि |

## द्वितीयगणः—अदादिः (2nd Conjugation)

भावार्थक: 'अस्' धातु: (To be)—परस्मैपदी

१. लट्—Present Tense.

| | | | |
|---|---|---|---|
| प्र. | अस्ति | स्तः | सन्ति |
| म. | असि | स्थः | स्थ |
| उ. | अस्मि | स्वः | स्मः |

२. लङ्—Imperfect (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | आसीत् | आस्ताम् | आसन् |
| म. | आसीः | आस्तम् | आस्त |
| उ. | आसम् | आस्व | आस्म |

३. लोट्—Imperative Mood.

| | | | |
|---|---|---|---|
| प्र. | अस्तु-स्तात्, | स्ताम् | सन्तु |
| म. | एधि-स्तात्, | स्तम् | स्त |
| उ. | असानि | असाव | असाम |

४. विधिलिङ्—Potential Mood.

| | | | |
|---|---|---|---|
| प्र. | स्यात् | स्याताम् | स्युः |
| म. | स्याः | स्यातम् | स्यात |
| उ. | स्याम् | स्याव | स्याम |

'अस्' धातोः इतरेषु लकारेषु 'भू' धातोः एव रूपाणि द्रष्टव्यानि ॥

## अष्टमगणः—तनादिः 8th (Conjugation)

करणार्थकः—'कृ' धातुः (To do) उभयपदी—परस्मैपदरूपाणि

### १. लट्—Present Tense.

| | | | |
|---|---|---|---|
| प्र. | करोति | कुरुतः | कुर्वन्ति |
| म. | करोषि | कुरुथः | कुरुथ |
| उ. | करोमि | कुर्वः | कुर्मः |

### २. लङ्—Imperfect (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | अकरोत् | अकुरुताम् | अकुर्वन् |
| म. | अकरोः | अकुरुतम् | अकुरुत |
| उ. | अकरवम् | अकुर्व | अकुर्म |

### ३. लोट्—Imperative Mood.

| | | | |
|---|---|---|---|
| प्र. | करोतु-कुरुतात्, | कुरुताम् | कुर्वन्तु |
| म. | कुरु - कुरुतात्, | कुरुतम् | कुरुत |
| उ. | करवाणि | करवाव | करवाम |

### ४. विधिलिङ्—Potential Mood.

| | | | |
|---|---|---|---|
| प्र. | कुर्यात् | कुर्याताम् | कुर्युः |
| म. | कुर्याः | कुर्यातम् | कुर्यात |
| उ. | कुर्याम् | कुर्याव | कुर्याम |

### ५. लुट्—First Future Tense.

| | | | |
|---|---|---|---|
| प्र. | कर्ता | कर्तारौ | कर्तारः |
| म. | कर्तासि | कर्तास्थः | कर्तास्थ |
| उ. | कर्तास्मि | कर्तास्वः | कर्तास्मः |

६. लृट्—Second Future Tense.

| | | | |
|---|---|---|---|
| प्र. | करिष्यति | करिष्यतः | करिष्यन्ति |
| म. | करिष्यसि | करिष्यथः | करिष्यथ |
| उ. | करिष्यामि | करिष्यावः | करिष्यामः |

७. लृङ्—Conditional Mood.

| | | | |
|---|---|---|---|
| प्र. | अकरिष्यत् | अकरिष्यताम् | अकरिष्यन् |
| म. | अकरिष्यः | अकरिष्यतम् | अकरिष्यत |
| उ. | अकरिष्यम् | अकरिष्याव | अकरिष्याम |

८. लिट्—Perfect (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | चकार | चक्रतुः | चक्रुः |
| म. | चकर्थ | चक्रथुः | चक्र |
| उ. | चकार-चकर, | चकृव | चकृम |

९. लुङ्—Aorist (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | अकार्षीत् | अकार्ष्टाम् | अकार्षुः |
| म. | अकार्षीः | अकार्ष्टम् | अकार्ष्ट |
| उ. | अकार्षम् | अकार्ष्व | अकार्ष्म |

१०. आशीर्लिङ्—Benedictive Mood.

| | | | |
|---|---|---|---|
| प्र. | क्रियात् | क्रियास्ताम् | क्रियासुः |
| म. | क्रियाः | क्रियास्तम् | क्रियास्त |
| उ. | क्रियासम् | क्रियास्व | क्रियास्म |

## ‘कृ’ धातोः—आत्मनेपदरूपाणि

### १. लट्—Present Tense.

| | | | |
|---|---|---|---|
| प्र. | कुरुते | कुर्वाते | कुर्वते |
| म. | कुरुषे | कुर्वाथे | कुरुध्वे |
| उ. | कुर्वे | कुर्वहे | कुर्महे |

### २. लङ्—Imperfect (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | अकुरुत | अकुर्वाताम् | अकुर्वत |
| म. | अकुरुथाः | अकुर्वाथाम् | अकुरुध्वम् |
| उ. | अकुर्वि | अकुर्वहि | अकुर्महि |

### ३. लोट्—Imperative Mood.

| | | | |
|---|---|---|---|
| प्र. | कुरुताम् | कुर्वाताम् | कुर्वताम् |
| म. | कुरुष्व | कुर्वाथाम् | कुरुध्वम् |
| उ. | करवै | करवावहै | करवामहै |

### ४. विधिलिङ्—Potential Mood.

| | | | |
|---|---|---|---|
| प्र. | कुर्वीत | कुर्वीयाताम् | कुर्वीरन् |
| म. | कुर्वीथाः | कुर्वीयाथाम् | कुर्वीध्वम् |
| उ. | कुर्वीय | कुर्वीवहि | कुर्वीमहि |

### ५. लुट्—First Future Tense.

| | | | |
|---|---|---|---|
| प्र. | कर्ता | कर्तारौ | कर्तारः |
| म. | कर्तासे | कर्तासाथे | कर्ताध्वे |
| उ. | कर्ताहे | कर्तास्वहे | कर्तास्महे |

६. लृट्—Second Future Tense.

| | | | |
|---|---|---|---|
| प्र. | करिष्यते | करिष्येते | करिष्यन्ते |
| म. | करिष्यसे | करिष्येथे | करिष्यध्वे |
| उ. | करिष्ये | करिष्यावहे | करिष्यामहे |

७. लृङ्—Conditional Mood.

| | | | |
|---|---|---|---|
| प्र. | अकरिष्यत | अकरिष्येताम् | अकरिष्यन्त |
| म. | अकरिष्यथाः | अकरिष्येथाम् | अकरिष्यध्वम् |
| उ. | अकरिष्ये | अकरिष्यावहि | अकरिष्यामहि |

८. लिट्—Perfect (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | चक्रे | चक्राते | चक्रिरे |
| म. | चकृषे | चक्राथे | चकृढ्वे |
| उ. | चक्रे | चकृवहे | चकृमहे |

९. लुङ्—Aorist (Past) Tense.

| | | | |
|---|---|---|---|
| प्र. | अकृत | अकृषाताम् | अकृषत |
| म. | अकृथाः | अकृषाथाम् | अकृढ्वम् |
| उ. | अकृषि | अकृष्वहि | अकृष्महि |

१०. आशीर्लिङ्—Benedictive Mood.

| | | | |
|---|---|---|---|
| प्र. | कृषीष्ट | कृषीयास्ताम् | कृषीरन् |
| म. | कृषीष्ठाः | कृषीयास्ताम् | कृषीढ्वम् |
| उ. | कृषीय | कृषीवहि | कृषीमहि |

॥ इति तिङन्तप्रकरणम् ॥

## प्रयोगनिरूपणम्——(Voices)

प्रयोगः त्रिविधः-(१) कर्तरि प्रयोगः Active Voice.
(२) कर्मणि प्रयोगः Passive Voice.
(३) भावे प्रयोगः Impersonal Voice.

### १. कर्तरि प्रयोगः

कर्तरि प्रयोगे कर्तृवाचकात् प्रथमा, कर्मवाचकात् द्वितीया च विभक्तिर्भवति। क्रियापदस्य कर्तृपदमनुसृत्य पुरुषवचने च भवतः। यथा 'गोपालः गां रक्षति' इत्यत्र 'गोपालः' कर्ता, 'गां' कर्म इति द्रष्टव्यम्।

कर्तरिप्रयोगोऽपि त्रिविधः—अकर्मकः, सकर्मकः, द्विकर्मकः इति। यथा चोक्तम्—

कर्तृ-कर्म-क्रिया-युक्तः प्रयोगः स्यात् सकर्मकः।
अकर्मकः कर्मशून्यः कर्मद्वन्द्वो द्विकर्मकः॥—इति

उदाहरणानि यथा—

१. अकर्मकः—पुष्पं विकसति, सूर्यः प्रकाशते।
२. सकर्मकः—गोपालः गां रक्षति, सुतः पितरं वन्दते।
३. *द्विकर्मकः—शिष्यः गुरुं संशयं पृच्छति॥

### २. कर्मणि प्रयोगः

१. कर्मणि प्रयोगे कर्तृवाचकात् पदात् तृतीया कर्मवाचकात् प्रथमा च विभक्तिः। क्रियापदस्य कर्मवाचकमनुसृत्य पुरुषवचने च भवतः। यथा 'गोपालेन गौः रक्ष्यते' इत्यत्र 'गोपालेन' कर्ता, 'गौः' कर्म इति द्रष्टव्यम्॥

---

*द्विकर्मका धातवः—
दुह्-याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्-मुषाम्।
कर्मयुक् स्यादकथितं तथा स्यात् नी-हृ-कृष्-वहाम् (कौमुदी)

*Note* :—The termination य is added to the root to form Passive Voice *e. g.* रक्ष्-रक्ष्यते, गम् - गम्यते, भू - भूयते etc.

२. द्विकर्मके [1]कर्मणि प्रयोगे तु अप्रधानकर्मवाचकात् पदात् प्रथमा विभक्तिः भवति। प्रधानकर्मवाचकात् द्वितीयैव। यथा—'शिष्येन गुरुः संशयं पृच्छयते' इत्यत्र 'गुरुः' अप्रधानकर्म, 'संशयं' प्रधानकर्म इति द्रष्टव्यम्॥

३. भावे प्रयोगः

भावे प्रयोगे कर्मणि प्रयोग इव कर्तृवाचकात् पदात् तृतीया विभक्तिः। यथा—पुष्पेण विकस्यते इत्यत्र 'पुष्पेण' कर्ता, कर्म न अस्ति इति द्रष्टव्यम्॥

उदाहरणानि

| कर्तरि प्रयोगः (सकर्मकः) | कर्मणि प्रयोगः |
|---|---|
| १. गोपालः गां रक्षति | गोपालेन गौः रक्ष्यते |
| २. शिष्यः गुरून् वन्दते | शिष्येण गुरवः वन्द्यन्ते |
| ३. अहं त्वां वन्दे | मया त्वं वन्द्यसे |
| ४. त्वं मां नमसि | त्वया अहं नम्ये |
| (द्विकर्मकः) | कर्मणि प्रयोगः |
| ५. शिष्यः गुरुं संशयं पृच्छति | शिष्येण गुरुः संशयं पृच्छयते |
| ६. गुरुः शिष्यं तत्वं ब्रूते | गुरुणा शिष्यः तत्वम् उच्यते |
| (अकर्मकः) | भावे प्रयोगः[2] |
| ७. पुष्पं विकसति | पुष्पेण विकस्यते |
| ८. त्वं वर्धसे | त्वया वृध्यते |
| ९. अहमस्मिन् गृहे वसामि | मया अस्मिन् गृहे उष्यते |
| १०. बालाः क्रीडन्ति | बालैः क्रीडयते |

1. अत्रेयं व्यवस्था—गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्, प्रथमा भवतीति शेषः॥ (कौमुदी)

2. भावे प्रयोगे सर्वदा क्रियापदस्य प्रथमपुरुषैकवचनमेव भवेत्॥

The various voices are aptly illustrated in the following slokas :—

[1]रामो विराजते [2]रामो भूमण्डलमपालयत् ।
[3]रामचन्द्रो दशग्रीवं परलोकमनीनयत् ॥ 1 ॥
[4]रामेणोपार्जिता कीर्तिः [5]रामचन्द्रेण भूयते ।
[6]रामेण कुम्भकर्णस्तु प्रापितस्त्रिदशालयम् ॥ 2 ॥
[7]शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना ।
[8]सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ 3 ॥
[9]श्रीमानपि महाविष्णुः लोकानां हितकाम्यया ।
ब्रह्मचारीव संप्राप्य बलिं भूमिमयाचत ॥ 4 ॥
[10]दुर्गाम्बायाः पदाम्भोजे येन स्वं क्रियते मनः ।
[11]न जीयतेऽरिणा युद्धे [12]तेनासौ जीयते रिपुः ॥ 5 ॥

The Corresponding voices in the above Slokas are mentioned here under :—

| | | | | |
|---|---|---|---|---|
| 1. | रामो विराजते | - अकर्मक | कर्तरि | प्रयोगः |
| 2. | रामो भूमण्डलमपालयत् | - सकर्मक | कर्तरि | प्रयोगः |
| 3. | रामचन्द्रो दशग्रीवं परलोकमनीनयत् | - द्विकर्मक | कर्तरि | प्रयोगः |
| 4. | रामेण कीर्तिः उपार्जिता | - एककर्मक | कर्मणि | प्रयोगः |
| 5. | रामचन्द्रेण भूयते | - | भावे | प्रयोगः |
| 6. | रामेण कुम्भकर्णस्तु त्रिदशालयं प्रापितः | - द्विकर्मक | कर्मणि | प्रयोगः |
| 7. | (शत्रुणा न हि ... .... सन्धिना) | - सकर्मक | कर्तरि | प्रयोगः |
| 8. | (सुतप्तमपि .... ... पावकम्) | - सकर्मक | कर्तरि | प्रयोगः |
| 9. | श्रीमानपि महाविष्णुः .... भूमिमयाचत | - द्विकर्मक | कर्तरि | प्रयोगः |
| 10. | दुर्गाम्बायाः ... .... क्रियते मनः | - | कर्मणि | प्रयोगः |
| 11. | अरिणा युद्धे न जीयते | - | भावे | प्रयोगः |
| 12. | असौ रिपुः तेन जीयते | - | कर्मणि | प्रयोगः |

## भावे कर्मणि च प्रयोगे विशेषः

सकर्मकेभ्यो धातुभ्यः कर्मणि, अकर्मकेभ्यो धातुभ्यो भावे च लकाराः भवन्ति । भावे कर्मणि च धातूनामात्मनेपद-मेव भवति ; न तु परस्मैपदम् । भावकर्मणोः लटि लङि लोटि लिङि च धातूनां प्रत्ययानां च मध्ये 'य' इत्येतदक्षरं संयो-ज्यते । यथा—वन्द् + य + ते = 'वन्द्यते' इत्येतत् कर्मणि रूपम् । एवं भू + य + ते = 'भूयते' इत्येतद् भावे रूपम् ॥

प्रधानभूतानां केषाञ्चित् धातूनां कर्तरि, कर्मणि, भावे च रूपाणि उदाह्रियन्ते—

| धातुः | कर्तरि- | कर्मणि भावे वा | धातुः | कर्तरि- | कर्मणि भावे वा |
|---|---|---|---|---|---|
| अस् | अस्ति | भूयते | दृश् | पश्यति | दृश्यते |
| आप् | आप्नोति | आप्यते | नी | नयति | नीयते |
| इष् | इच्छति | इष्यते | पा | पिबति | पीयते |
| ईक्ष् | ईक्षते | ईक्ष्यते | यज् | यजति | इज्यते |
| कथ् | कथयति | कथ्यते | लभ् | लभते | लभ्यते |
| कृ | करोति | क्रियते | वन्द् | वन्दते | वन्द्यते |
| क्षम् | क्षमते | क्षम्यते | वह् | वहति | उह्यते |
| गम् | गच्छति | गम्यते | स्तु | स्तौति | स्तूयते |
| गा | गायति | गीयते | स्था | तिष्ठति | स्थीयते |
| ग्रह् | गृह्णाति | गृह्यते | स्मृ | स्मरति | स्मर्यते |
| जि | जयति | जीयते | हन् | हन्ति | हन्यते |
| दा | यच्छति | दीयते | शास् | शास्ति | शिष्यते |

## * वृत्तिनिरूपणम्

द्वाभ्यां बहुभिर्वा पदैः बोधनीयोऽर्थः संस्कृतभाषायां कदाचित् एकेन पदेन बोधयितुं शक्यते। यथा — 'वसुदेवस्य अपत्यं पुमान्' इत्ययमर्थः 'वासुदेवः' इत्येकेन पदेन बोध्यते। अस्य लघुमार्गस्य 'वृत्तिः' इति संज्ञा। वृत्तयः पञ्च। यथा—

कृत्तद्धित सनाद्यन्तधातुभ्यश्चैकशेषतः।
समासादपि विद्वद्भिः कथिताः पञ्चवृत्तयः॥

(१) कृद्वृत्तिः (२) तद्धितवृत्तिः (३) सनाद्यन्तधातुवृत्तिः (४) एकशेषवृत्तिः (५) समासवृत्तिः—इति॥

### १. कृद्वृत्तिः

(Formation of words from roots with primary affixes)

कृत्प्रत्ययाः धातुभ्यो विधीयन्ते। प्रायेण नामशब्दाः सर्वे धातुषु कृत्प्रत्ययानां योजनेन निष्पन्नाः।

भक्तानामपि मर्त्यानाम् अमराणामथापि वा।
संपादयति या ज्ञानं तां वाचं प्रणमाम्यहम्॥

भजन्ते इति भक्ताः। म्रियन्ते इति मर्त्याः।
ज्ञायते अनेन इति ज्ञानम्। उच्यते इति वाक्।

---

* वृत्ति is the general term for any group formation in Sanskrit requiring explanation.

## २. तद्धितवृत्तिः

(Formation of derivative bases from nouns by Secondary affixes)

यथा कृत्प्रत्ययाः धातुभ्यो विधीयन्ते तथा तद्धित-प्रत्ययाः नामभ्यो विधीयन्ते । यथा—

मानुषानादितेयान् वा पीडयन्तो भुवि स्थिताः ।
ये दैतेयास्तान् निहन्तुं जातो दाशरथिर्हरिः ॥

| | | |
|---|---|---|
| मनोः | अपत्यानि | पुमांसः=मानुषाः |
| अदितेः | अपत्यानि | पुमांसः=आदितेयाः (आदित्याः) |
| दितेः | अपत्यानि | पुमांसः=दैतेयाः (दैत्याः) |
| दशरथस्य | अपत्यं | पुमान् =दाशरथिः |

## ३. सनाद्यन्तधातुवृत्तिः—सा पञ्चविधा

सन्नन्ताः (Desideratives) Examples :—

भू–भवितुमिच्छति=बुभूषति । गम्-गन्तुमिच्छति=जिगमिषति
कृ–कर्तुमिच्छति=चिकीर्षति । दृश्-द्रष्टुमिच्छति=दिदृक्षते ।
श्रु–श्रोतुमिच्छति=शुश्रूषते । ज्ञा–ज्ञातुमिच्छति=जिज्ञासते ।
आप्–आप्तुमिच्छति=ईप्सति । जि–जेतुमिच्छति=जिगीषति ।

2. णिजन्ताः (Causals) Examples :—

भू—भावयति । गम्—गमयति । कृ—कारयति ।
दृश्—दर्शयति । हन्—घातयति । दा—दापयति ।

यङन्ताः (Frequentatives)

(In this वृत्ति the termination यङ् is added and the root takes आत्मनेपद terminations only)

भू—अतिशयेन भवति = बोभूयते ।
दीप्—अतिशयेन दीप्यते = देदीप्यते ॥
जि—अतिशयेन जयति = जेजीयते ।
नृत्—अतिशयेन नृत्यति = नरीनृत्यते ॥

यङ्लुगन्ताः (Frequentatives)

(In this वृत्ति the termination यङ् is dropped and the root takes परस्मैपद terminations only)

यः पास्पर्धीति वा लोकान् देवैर्वैरायते सदा ।
राक्षसस्य विनाशाय तस्य पुत्रीयति प्रभुः ॥

अतिशयेन स्पर्धते इति पास्पर्धीति । एवम्, अतिशयेन भवति = बोभवीति । अतिशयेन करोति = चर्करीति इत्यादयः ॥

5. नामधातवः (Denominatives)

| प्रत्ययाः | अर्थः | नामधातुरूपाणि |
| --- | --- | --- |
| १. काम्यच् — | पुत्रम् आत्मनः इच्छति | = पुत्रकाम्यति । |
| | यशः आत्मनः इच्छति | = यशस्काम्यति ॥ |

२. क्यच्—(१) पुत्रम् आत्मनः इच्छति = पुत्रीयती ।
यशः आत्मनः इच्छति = यशस्यति ॥
(२) पुत्रम् इव आचरति = पुत्रीयति ।
पितरम् इव आचरति = पित्रीयति ।
प्रासादे इव आचरति = प्रासादीयति ॥
३. आचारक्विप्—हंसः इव आचरति = हंसति ।
कृष्णः इव आचरति = कृष्णति ॥
४. क्यङ्— हंसः इव आचरति = हंसायते ।
कृष्णः इव आचरति = कृष्णायते ।
सिंहः इव आचरति = सिंहायते ॥
५. क्यष्— लोहितः भवति = लोहितायति, लोहितायते ।
मन्दः भवति = मन्दायति, मन्दायते ।
६. यक्—कण्डूयति, असूयति, सख्यति, दुख्यति ॥
इमे प्रधाननामधातवः । अन्ये च यथासंभवं विज्ञेयाः ॥

---

### ४. एकशेषवृत्तिः

सर्वेषामपि लोकानां पितरौ यौ सनातनौ ।
विदितौ पालनाच्चित्ते तौ शिवौ सततं भजे ॥

---

माता च पिता च=पितरौ । सनातनी च सनातनश्च=सनातनौ ।
विदिता च विदितश्च=विदितौ । सा च स च=तौ ।
शिवा च शिवश्च=शिवौ ॥

## ५. समासवृत्तिः—Compounds

(Formation of a compound word by the Composition of several words)

षोढा समासाः संक्षेपात् अष्टाविंशतिधा पुनः ।
नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥

तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः ।
सप्तधा च बहुव्रीहिः द्विगुराभाषितो द्विधा ॥

द्वन्द्वोऽपि द्विविधो ज्ञेयोऽव्ययीभावो द्विधा मतः ।
तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधम् ॥

| | | | |
|---|---|---|---|
| 1. | तत्पुरुष | समासः—अष्टविधः | 8 |
| 2. | कर्मधारय | समासः—सप्तविधः | 7 |
| 3. | बहुव्रीहि | समासः—सप्तविधः | 7 |
| 4. | द्विगु | समासः—द्विविधः | 2 |
| 5. | द्वन्द्व | समासः—द्विविधः | 2 |
| 6. | अव्ययीभाव | समासः—द्विविधः | 2 |
| | | | 28 |

एतन्दन्तर्हित विशेषसमासः—

लुक् समासः — अलुक् समासः
नित्य समासः — अनित्य समासः

## 1. तत्पुरुषसमासः—अष्टविधः

7 Kinds according to विभक्ति and the 8th नञ् तत्पुरुषः (Negative)

तत्पुरुषोऽष्टविधोऽभूत् प्रथमादिविभक्तिनञ्कृतैर्भेदैः ।
उत्तरपदजनितार्थो मुख्यस्तत्रेति पण्डितैः ख्यातः ॥

### १. प्रथमा तत्पुरुषः

अमृतं योऽपिबद्दैत्यः तं वैकुण्ठो द्विधाऽच्छिनत् ।
राहुरुत्तरकायोऽस्य पूर्वकायोऽभवत् ध्वजः ॥

[1]उत्तरः कायस्य=उत्तरकायः । पूर्वः कायस्य=पूर्वकायः ॥

### २. द्वितीया तत्पुरुषः

दुःखातीतो भवत्येव यदि कृष्णाश्रितो जनः ।
अथवाऽन्नबुभुक्षुः सन् मुहूर्तसुखमश्नुते ॥

दुःखम् अतीतः=दुःखातीतः । कृष्णं श्रितः=कृष्णाश्रितः ।
अन्नं बुभुक्षुः=अन्नबुभुक्षुः । मुहूर्तं सुखम्=मुहूर्तसुखम् ॥

### ३. तृतीया तत्पुरुषः

मासावरस्त्वं खलु मासपूर्वस्त्वहं तु विद्यानिपुणो नितान्तम् ।
इतीव संसद्यपि बाडवानां परस्परं वाक्कलहो बभूव ॥

---

1. समासार्थबोधकवाक्यस्य 'विग्रहवाक्यम्' (Analysis of a Compound into its Component parts) इति संज्ञा । *e.g.* **उत्तरः कायस्य is the विग्रहवाक्य of the समास 'उत्तरकायः'।**

मासेन अवरः=मासावरः । मासेन पूर्वः=मासपूर्वः ।

विद्यया निपुणः=विद्यानिपुणः । वाचा कलहः=वाक्कलहः ॥

### ४. चतुर्थी तत्पुरुषः

गृही भूतबलिं दत्ते गोसुखं तु कृषीबलः ।

दत्ते यष्टा यूपदारु कुण्डलाष्टापदं बुधः ॥

भूतेभ्यः बलिः=भूतबलिः । गवे सुखम्=गोसुखम् ।

यूपाय दारु=यूपदारु । कुण्डलाय अष्टापदम्=कुण्डलाष्टापदम् ।

### ५. पञ्चमी तत्पुरुषः

पूर्वं चोरभयं प्राप्य व्याघ्रभीतस्ततः परम् ।

सुखापेतो जनः सम्यक् अरण्ये निवसेत् कथम् ॥

चोरात् भयं=चोरभयम् । व्याघ्रात् भीतः=व्याघ्रभीतः

सुखात् अपेतः=सुखापेतः

### ६. षष्ठी तत्पुरुषः

अधिकं राजपुरुषः सेव्यः सर्वमहान् यतः ।

वृक्षमूलमुपाश्रित्य जपतो देवपूजकात् ॥

राज्ञः पुरुषः=राजपुरुषः । सर्वेषां महान्=सर्वमहान् ।

वृक्षस्य मूलम्=वृक्षमूलम् । देवानां पूजकः=देवपूजकः ॥

### ७. सप्तमी तत्पुरुषः

प्राश्यान्नमीश्वराधीनं स्थालीपक्वं तु मानवः ।

वर्त्मन्यातपशुष्कः सन् दानशौण्डः कथं भवेत् ? ॥

ईश्वरे अधीनं=ईश्वराधीनं । स्थाल्यां पक्वं=स्थालीपक्वम् ।
आतपे शुष्कः=आतपशुष्कः । दाने शौण्डः=दानशौण्डः ।

८. नञ् तत्पुरुषः

न धर्मः=अधर्मः । न अश्वः=अनश्वः । न उदारः=अनुदारः ।
न कुलं अस्य=नकुलः । न क्षरति इति=नक्षत्रम् ।

---

2. कर्मधारयसमासः—सप्तविधः
(Appositional Compounds)

(Members of कर्मधारय समास have the same Case when dissolved)

कविभिः सप्तविधः स्यादित्येवं कर्मधारयः कथितः ।
तत्पुरुषान्तर्भावात् तद्वत् प्राधान्यमीरितं चास्य ॥
विशेषणं पूर्वपदे विशेष्यं तथोभयत्रापि विशेषणं च ।
यस्योपमानं परतस्तदादौ संभावना चाप्यवधारणा च ॥

१. विशेषणपूर्वपद कर्मधारयः

नीलोत्पलानि नारीणां नयनानीव रेजिरे ।
कम्पितान्यल्पवातेन सत्सरस्सु स्थितान्यहो ॥

नीलानि च तानि उत्पलानि च=नीलोत्पलानि ।
अल्पश्चासौ वातश्च=अल्पवातः ।
सन्ति च तानि सरांसि च=सत्सरांसि ॥

## २. विशेष्यपूर्वपद कर्मधारयः

उद्वीक्ष्य यस्य मातङ्गान् घना इति मनीषया ।
मयूरव्यंसका हृष्टा ननृतुस्तं नृपं भजे ॥

मयूराश्च ते व्यंसकाश्च=मयूरव्यंसकाः ।

## ३. विशेषणोभयपद कर्मधारयः

पुंसां स्नातानुलिप्तानां अन्नं भोज्योष्णमेव हि ।
पथ्यमित्यब्रवीद्वैद्यः शास्त्रैर्निश्चप्रचं वचः ॥

स्नाताश्च ते अनुलिप्ताश्च = स्नातानुलिप्ताः ।
भोज्यं च तत् उष्णं च = भोज्योष्णम् ।
निश्चितं च तत् प्रचितं च = निश्चप्रचम् ॥

## ४. उपमानोत्तरपद कर्मधारयः

रामोऽयं पुरुषव्याघ्रः संवृतः कपिकुञ्जरैः ।
हनिष्यति बलाद्युद्धे रावणं राक्षसर्षभम् ॥

पुरुषो व्याघ्र इव = पुरुषव्याघ्रः ।
कपयः कुञ्जरा इव = कपिकुञ्जराः ।
राक्षसः ऋषभ इव = राक्षसर्षभः ॥

## ५. उपमान पूर्वपद कर्मधारयः

कौमुदीविशदा भाति या वाणी रतिसुन्दरी ।
लतातन्वी सदा दद्यात् सा द्राक्षामधुरां गिरम् ॥

कौमुदी इव विशदा = कौमुदीविशदा। रतिः इव सुन्दरी = रतिसुन्दरी।
लता इव तन्वी=लतातन्वी। द्राक्षा इव मधुरा=द्रक्षामधुरा।

### ६. संभावनापूर्वपद कर्मधारयः

तमालवृक्षैरभितः संवृतो विन्ध्यपर्वतः।
बम्भैरः सकलैर्दृष्टो दूराद्गजमनीषया ॥

तमाला इति वृक्षाः = तमालवृक्षाः।
विन्ध्य इति पर्वतः = विन्ध्यपर्वतः।
गज इति मनीषा = गजमनीषा।

### ७. अवधारणापूर्वपद कर्मधारयः

मनीषासलिलैर्युक्तिरत्नैर्वाकल्पनोर्मिभिः।
यशस्सरिद्भिः संपन्नो भात्ययं कविसागरः ॥

मनीषा एव सलिलं = मनीषासलिलम्।
युक्तयः एव रत्नानि = युक्तिरत्नानि।
कल्पना एव ऊर्मयः = कल्पनोर्मयः।
यशांसि एव सरितः = यशस्सरितः ॥

---

### 3. बहुव्रीहिसमासः—सप्तविधः

सप्तभिराख्याभिर्वा विख्यातो यः सर्वैर्बहुव्रीहिः।
अन्यपदार्थो मुख्यः कथितो विबुधैर्बहुव्रीहौ।

द्वाभ्यां पदाभ्यां बहुभिः पदैर्वा संख्योभयोः सा यस्योः पदाग्रे ।
यत्राभवत्पूर्वपदं सहश्च दिगन्तरालव्यतिहारलक्ष्मा ॥

बहुव्रीहिः प्रायेण अन्यपदार्थो विशेष्यनिघ्नश्च ।

धृतः भारः येन सः = धृतभारः (पुं)

धृतः भारः यया सा = धृतभारा (स्त्री)

धृतः भारः येन तत् = धृतभारम् (नपुं)

## १- द्विपद बहुव्रीहिः

प्राप्ताग्निमेवमिषुमीढरथानथाश्वान्
तूणीरमुद्धृतशरं च वहन् जवेन ।
रुद्रोऽपि वीरपुरुषाः स पुरो बिभेद
देवैश्च दत्तपशुरेव महाबलः सन् ॥

1. प्राप्तः अग्निः यं सः = प्राप्ताग्निः ।
2. ऊढः रथः यैस्ते = ऊढरथाः ।
3. दत्तः पशुः यस्मै सः = दत्तपशुः ।
4. उद्धृताः शराः यस्मात् सः = उद्धृतशरः ।
5. वीराः पुरुषाः यासु ताः = वीरपुरुषाः ।
6. महत् बलं यस्य सः = महाबलः ।

## २. बहुपद बहुव्रीहिः

नीलोत्पलवपुः पातु श्रीमत्पीतांबरो हरिः ।
यस्य प्रसादात् कुब्जाऽभूत् दिव्यसुन्दरविग्रहा ॥

नीलम् उत्पलं वपुः यस्य सः=नीलोत्पलवपुः ।

श्रीमत् पीतम् अम्बरं यस्य सः = श्रीमत्पीताम्बरः ।

दिव्यः सुन्दरः विग्रहः यस्याः सा = दिव्यसुन्दरविग्रहा ॥

## ३. संख्योभयपद बहुव्रीहिः

काननेऽस्मिन्नहो राजन् द्वित्रैरायासिता जनैः ।
लभ्यन्ते पञ्चषाः नागाः इत्यूचुर्बलिनः प्रभुम् ॥

द्वौ वा त्रयो वा = द्वित्राः

पञ्च वा षट् वा = पञ्चषाः

## ४. संख्योत्तरपद बहुव्रीहिः

ब्राह्मणाः कति वा रुद्रा वदन्तमिति संख्यया ।
कुशलस्त्वेकया युक्त्या वदेदुपदशा इति ॥

दशानां समीपे ये सन्ति ते = उपदशाः ।

एकादशानां समीपे ये सन्ति ते = उपैकादशाः ॥

## ५. सहपूर्वपद बहुव्रीहिः

सकलाः सहसन्तानाः सकला अपि वाडवाः ।
प्रोचुः स्वस्ति महीपाय सहपुत्राय सन्ततम् ॥

कलाभिः सह वर्तन्ते इति = सकलाः ।

सन्तानैः सह वर्तन्ते इति = सहसन्तानाः ।

पुत्रेण सह वर्तते इति = सहपुत्रः (सपुत्रः) ॥

### ६. दिगन्तराळलक्षण बहुव्रीहिः

विद्युदुत्तरपूर्वायाममोघा मारुतोऽथवा ।
यदि दक्षिणपूर्वायां वृष्टिर्नैव भवेत्तदा ॥

उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तराळं सा = उत्तरपूर्वा ।
दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तराळं सा = दक्षिणपूर्वा ॥

### ७. व्यतिहारलक्षण बहुव्रीहिः

बाहूबाहवि केषांचित् मुष्टीमुष्टयद्भुतं तथा ।
केशाकेश्यभवद्युद्धं वानराणां च रक्षसाम् ॥

बाहुभिश्च बाहुभिश्च गृहीत्वा इदं युद्धं प्रवृत्तं = बाहूबाहवि ।
मुष्टिभिश्च मुष्टिभिश्च प्रहृत्य इदं युद्धं प्रवृत्तं = मुष्टीमुष्टि ।
केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं = केशाकेशि ।

### 4. द्विगु समासः—द्विविधः

स चैकवद्भाव्यनेकवद्भावीति द्विधा द्विगुः ।
कर्मधारय एवास्याप्यन्तर्भावो बुधैर्मतः ॥

### १. एकवद्भावी द्विगुः

पञ्चवट्या समं क्षेत्रं त्रिलोक्यां न हि विद्यते ।
तत्र पञ्चगवं दत्वा जनः श्रेष्ठपदं व्रजेत् ॥

पञ्चानां वटानां समाहारः = पञ्चवटी ।
त्रयाणां लोकानां समाहारः = त्रिलोकी ।
पञ्चानां गवां समाहारः = पञ्चगवम् ।

## २. अनेकवद्भावी द्विगुः

युद्धेषु विबुधाः सर्वे बाडवाश्चाध्वरेष्वपि ।
गायन्ति यं कार्यसिद्ध्यै भजे षाण्मातुरं मुदा ।
शिवेन प्रहिता देवीं लब्धुं सप्तर्षयो वराः ॥
गिरीन्द्रोऽपि प्रहृष्टस्सन् सुतां प्रादात् भवाय हि ॥

षण्णां मातॄणाम् अपत्यं पुमान् = षाण्मातुरः ।
सप्त च ते ऋषयश्च = सप्तर्षयः ॥

---

## 5. द्वन्द्व समासः—द्विविधः

('च' कार बहुलो द्वन्द्वः—इति द्वन्द्व समास लक्षणम्)

यस्मिन् समासे प्राधान्यम् उभयोः स्यात्पदार्थयोः ।
स हि द्वन्द्वो द्विधा ज्ञेयः बुधैरिति विनिश्चितः ॥
इतरेतरयोगाख्यः समाहाराह्वयस्तथा ।
द्वाभ्यां पदाभ्यां बहुभिरुभौ चेति चतुर्विधः ॥

### 1. १. द्विपदेतरेतरयोगद्वन्द्वः

ययोर्बलेन समितौ निहतौ कंसरावणौ ।
सूर्याचन्द्रमसोर्वंश्यौ रामकृष्णावहं भजे ॥

कंसश्च रावणश्च = कंसरावणौ । सूर्यश्च चन्द्रमाश्च = सूर्याचन्द्रमसौ
रामश्च कृष्णश्च = रामकृष्णौ

२. बहुपदेतरेतरयोग द्वन्द्वः

वापीकूपतटाकानां महतां स्थापनादपि ।
धर्मार्थकाममोक्षाश्च सिध्यन्त्यत्र न संशयः ॥

वापी च कूपश्च तटाकश्च = वापीकूपतटाकाः ।
धर्मश्च अर्थश्च कामश्च मोक्षश्च = धर्मार्थकाममोक्षाः ॥

२. १. द्विपदसमाहार द्वन्द्वः

शीतोष्णं सुखदुःखं वा सहन् यो वर्तते सदा ।
नियम्य वाक्त्वचं सम्यक् स हि योगीति कथ्यते ॥

शीतं च उष्णं च तयोः समाहारः=शीतोष्णम् ।
सुखं च दुःखं च तयोः समाहारः = सुखदुःखम् ।
वाक् च त्वक् च तयोः समाहारः = वाक्त्वचम्

२. बहुपद समाहार द्वन्द्वः

ढक्कामृदंगपटहं यस्य दध्मान मन्दिरे ।
अश्वहस्तिरथं चास्तु भावुकं तस्य भूभृतः ॥

ढक्का च मृदंगश्च पटहश्च तेषां समाहारः = ढक्कामृदंगपटहम् ।
अश्वश्च हस्ती च रथश्च तेषां समाहारः = अश्वहस्तिरथम् ।

---

6. अव्ययीभाव समासः—द्विविधः

यस्याभवत्पूर्वपदेऽव्ययस्य
नाम्नो विधानात् द्विविधं च लक्ष्म ।
पूर्वः पदार्थोऽपि च यत्र मुख्यः
तमव्ययीभावमुदाहरामः ॥

## १. अव्ययपूर्वपदाव्ययीभावः

भो राजन् प्रत्यहं भूयात् यथाशक्त्यधिबाडबम् ।
भक्तिस्तथाऽस्तु संभद्रं निष्पापमुपलोचनम् ॥

अहन्यहनि=प्रत्यहम्        शक्तिमनतिक्रम्य=यथाशक्ति ।

बाडवेषु = अधिबाडबम् ।     लोचनयोः समीपे = उपलोचनम् ।

पापानाम् अभावः=निष्पापम् ।        भद्राणां समृद्धिः = संभद्रम्

## 2. नामपूर्वपदाव्ययीभावः

स्वस्यापि भोजने यस्य सूपप्रति न युज्यते ।
शाकप्रत्यथवाऽन्येभ्यः कथं दास्यति स प्रभुः ॥

सूपस्य लेशः=सूपप्रति ।  शाकस्य लेशः=शाकप्रति ।

---

## लुक् समासः

In this compound the case endings of the w ords (that it contains) are dropped.

E. कृष्णं श्रितः=कृष्णश्रितः Here the द्वितीया विभक्ति (of कृष्ण) is dropped.

Mostly all compounds will be लुक्समास.

## अलुक् समासः

---

In this compound the case endings are not dropped. This variety may be seen rarely in all compounds.

कण्ठेकालं स्मरन्नेव जनुषाऽन्धो हृदिस्पृशम् ।
वाचोयुक्तिं वदन् जीवत्यन्तिकादागतं प्रति ॥

कण्ठेकाल: यस्य स:=कण्ठेकाल: (बहुव्रीहि:)
जनुषा अन्ध: =जनुषान्ध: (तत्पुरुष:)
हृदि स्पृशति इति =हृदिस्पृक् (उपपद समास:)
वाच: युक्ति: =वाचोयुक्ति: (तत्पुरुष:)
अन्तिकात् आगत: =अन्तिकादागत: (तत्पुरुष:)

---

## नित्य समासः

In this compound the विग्रह वाक्य cannot be given by using the words actually compounded.

Ex, चन्द्रेण सदृश:=चन्द्रसन्निभ: । The word सन्निभ should not be used in विग्रह वाक्य । The meaning of सन्निभ is expressed by सदृश ।

This variety is very rarely seen.

---

## अनित्य समासः

In this variety the words compounded can be also used seperately.

Ex: राज्ञ: पुरुष:=राजपुरुष: । Here the two words राज and पुरुष in compound can be used in विग्रहवाक्य also.

## आकाङ्क्षा—Analysis

पद्ये - गद्ये वा, सुलभेन अन्वयज्ञानाय (Prose order) प्रश्नरूपेण तत्तत्पद संयोजनोपायस्य 'आकाङ्क्षा' इति संज्ञा।

**यथा — वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥**

(रघुवंशमहाकाव्ये मंगळश्लोकः)

The Analysis of the above Sloka is as follows:—

वन्दे - क्रियापदम् - कः ? **कर्तुः** आकाङ्क्षा
'अहम्' इत्युत्तरम् 'अहं वन्दे' इति अन्वयः

कौ ? **कर्मणः** आकाङ्क्षा 'पार्वतीपरमेश्वरौ' इति उत्तरम्
'अहं पार्वतीपरमेश्वरौ वन्दे' इति अन्वयः

कथंभूतौ पार्वतीपरमेश्वरौ ? **कर्मविशेषणस्य** आकाङ्क्षा
'जगतः पितरौ' इति उत्तरम्

पुनः कथं भूतौ ? इति **द्वितीयकर्मविशेषणस्य** आकाङ्क्षा
'वागर्थाविव संपृक्तौ' इति उत्तरम्

किमर्थं वन्दे ? **क्रियाविशेषणाकाङ्क्षा** 'वागर्थप्रतिपत्तये इति' उत्तरम्

'अहं वागर्थाविव संपृक्तौ, जगतः पितरौ, पार्वतीपरमेश्वरौ वागर्थप्रतिपत्तये वन्दे,' इति संपूर्णः अन्वयः।

The following is a rare specimen Sloka giving Examples in all विभक्तिs with विशेषण and विशेष्य—

**रामः क्षेमं चकार प्रचुरजनपदे कोसले जागरूकः**
**सौजन्यात् स्वाच्च नीत्या मनुमतिहितया सर्वभूमिस्थितानाम्।**
**धृत्वा राज्यं स्थिरायै तदनु तनुभृतां धर्मसिद्ध्या अलभ्यं**
**निर्विघ्नं वैरिवर्गप्रतिभटकरवालोल्लसद्बाहुदण्डः॥**

An Example for the आकाङ्क्षा of a sentence (वाक्य) is thus :—

'बुद्धिमान् रामः सायं प्रातः पार्वतीपतिम् ईश्वरं नमति' इति वाक्ये पूर्वक्रियापदं 'नमति' इति। तत्र-नमति, कः? इति प्रश्नः जायते। उत्तरं 'रामः' इति। इयं 'कर्तुः आकाङ्क्षा'

२. 'कम्' (कौ, कान्, काम्, किम्) इति प्रश्नः कर्मणः आकाङ्क्षा इति उच्यते। यथा—तस्मिन् एव वाक्ये रामः 'कं' नमति? इति प्रश्नः। उत्तरम् 'ईश्वरम्' इति। इयं 'कर्मणः आकाङ्क्षा'

३. 'कथंभूतः' 'कीदृशः' इति प्रश्ने 'कर्तृविशेषणस्य आकाङ्क्षा'। यथा—तस्मिन् एव वाक्ये 'कथं भूतः' रामः ईश्वरं नमति? इति 'कर्तृविशेषणस्य आकाङ्क्षा'। 'बुद्धिमान्' रामः ईश्वरं नमति इति उत्तरम्।

४. 'कथंभूतम्' कीदृशम्, इति प्रश्ने 'कर्मविशेषणस्य आकाङ्क्षा' यथा—बुद्धिमान् रामः 'कीदृशम्' ईश्वरं नमति? इति कर्मविशेषणस्य आकाङ्क्षा। बुद्धिमान् रामः 'पार्वतीपतिम्' ईश्वरं नमति इति उत्तरम्।

५. 'कदा' 'कुत्र' 'कथम्' 'कुतः' इत्यादि प्रश्नः क्रियाविशेषणस्य आकङक्षा। यथा—बुद्धिमान् रामः पार्वतीपतिं ईश्वरं 'कदा' नमति? इति प्रश्नः। इयं क्रियाविशेषणस्य आकाङ्क्षा। उत्तरं बुद्धिमान् रामः पार्वतीपतिम् ईश्वरं 'सायं प्रातः' नमति इति।

(Adopted from संस्कृत व्याकरण प्रवेशिका Book)

## अव्यय प्रकरणम्—Indeclinables,

येषां पदानां लिङ्ग-विभक्ति-वचननिमित्तको रूपभेदो नास्ति तानि 'अव्ययानि' इत्युच्यन्ते ।

(अव्यय is a word which has no Gender, Case or Number and which undergoes no change.)

उक्तं च—सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥—इति ।

१. अव्ययीभावसमासः सर्वोऽप्यव्ययत्वेन ज्ञेयः । यथा—उपनगरम् (Near town), अधिवृक्षम् (In the tree) मध्येमार्गम् (In the middle of the way) etc.

२. Adjectives will become अव्यय when used as Adverbs. यथा—'सुन्दरं गमनम्' इत्यत्र सुन्दर शब्दो विशेषणम् (Adjective)। स एव 'सुन्दरं गच्छति' इत्यत्र क्रियाविशेषणम् (Adverb)। Hence in the second sentence 'सुन्दरम्' is अव्ययम् ।

३. सुबन्तप्रतिरूपकाणि कानिचिदव्ययानि दृश्यन्ते । यथा—अस्तम् setting, नमः a salutation, स्वस्ति hail, स्वाहा food offered to Gods, स्वधा food offered to पितृs or Manes. शम् happiness etc.

---

१. 'स्वरादिनिपातमव्ययम्'—पाणिनिसूत्रम् ॥

२. तत्तद्विशेषणशब्दस्य द्वितीयैकवचनं क्रियाविशेषणत्वेन प्रयोक्तव्यमिति नियमः ॥

४. तिङन्तप्रतिरूपकाणि कानि कानिचिदव्ययानि—अस्ति that exists, नास्ति that does not exist, अस्मि I, आह said, आस there was, happened, इत्यादीनि ॥

५. तद्धितान्तानि अव्ययानि त्रिविधानि :—

(1) तसिलन्तानि (Having the sense of the Ablative case) मातृतः from the mother, पितृतः from the father, आदितः from the beginning, मध्यतः from the middle, स्वरतः from the Voice.

(2) वत्वन्तानि (By adding the termination वत्) वत् is affixed in the sense of 'equally with' or 'like' तद्वत् equally with that; etc.

(3) शसन्तानि—(By adding the termination शस्) अल्पशः little by little, बहुशः mostly, खण्डशः bit by bit इत्यादीनि ।

६. कृदन्तानि अव्ययानि त्रिविधानि—

The Indeclinable Past Participles—

(1) क्त्वान्तानि—गत्वा having gone. कृत्वा having done. दृष्ट्वा having seen etc.

(2) ल्यबन्तानि—य is added instead of त्वा to roots with prepositions—निर्गत्य having gone out, संस्कृत्य having refined, सन्दृश्य having interviewed etc.

(3) तुमुन्नन्तानि—The Infinitive of purpose. गन्तुं to go, कर्तुं to do, द्रष्टुं to see etc.

७. सर्वनाम अव्ययानि (These अव्ययs are derived from सर्वनामशब्दs)

शब्दः [1]यत्—यदा when, यत्र where यथा as, यतः whence, since, because.

तत्—तदा or तदानीम् then, at that time, तत्र there, तथा तर्हि then, therefore.

इदम्—इदानीम् now, अत्र here, इत्थम् thus, अतः hence.

एतत्—एतर्हि now, अत्र here, इत्थम् thus, अतः hence, therefore.

किम्—कदा when? कुत्र or क्व where? कथम् how? कुतः why? whence?

सर्व—सर्वदा or सदा always, सर्वत्र everywhere, in all places सर्वथा by all means, सर्वतः everywhere, on all sides.

अन्य—अन्यदा in other times, अन्यत्र elsewhere, in another place, अन्यथा otherwise in a different manner, अन्यतः from elsewhere.

एक—एकदा once, once upon a time, एकत्र in one place, एकतः from one place.

अदस्—अमुत्र there in the next world, अमुतः from that place or person.

---

1. The following words resembling शब्दरूप are often used as अव्ययs in the resepctive meanings as given below :—

| शब्दः | प्रथमा | तृतीया | पञ्चमी | Meaning |
|---|---|---|---|---|
| यद्— | यत् | येन | यस्मात् | because |
| तद्— | — | तेन | — | hence |
| पूर्व— | पूर्वम् | — | — | in ancient days |

पर—परत्र in the next world, in another place, परत: further or beyond.

अपर—अपरत्र in another place, अपरथा in another manner, अपरत: from another place.

पूर्व—पूर्वत्र in the preceeding part, previously, पूर्वत: from the previous place, in front of,

उभय—उभयत्र in both places, उभयथा in both ways, उभयत: from both sides.

उत्तर—उत्तरत्र subsequently, उत्तरत: from the north, उत्तरेण to the north.

दक्षिण—दक्षिणत: from the south, दक्षिणेन to the south.

## ८. सङ्ख्या अव्ययानि

सकृत् once, द्वि. twice, त्रि: thrice, चतु: four times, पञ्चकृत्व: five times, षट्कृत्व: six times, etc,

एकधा in one way द्विधा or द्वेधा in two ways, त्रिधा or त्रेधा in three ways, चतुर्धा in four ways, पञ्चधा in five ways, षड्धा or षोढा in six ways, सप्तधा, अष्टधा, नवधा, दशधा etc.

एकश: one by one, द्विश: two by two, by twos, त्रिश: चतुश्श:, पञ्चश: शतश: सहस्रश: etc.

---

*By adding कृत्व: to any number, other than 1 to 4 similar multiples are formed. 'वारं' also may be added to numbers to form similar multiples as एकवारम्, द्विवारम्, पञ्चवारम्, दशवारम्, etc.

## ९. कालवाचकानि अव्ययानि

अद्य to-day

अद्यत्वे now-a-days

उषा at dawn

श्वः to-morrow

परश्वः day-after-to-morrow

ह्यः yesterday

परेद्युः } next day
परेद्यवि }

अपरेद्युः on the following day

सद्यः at once

अधुना } now
सम्प्रति }

पुरा in olden days

पूर्वेद्युः previous day

अन्येद्युः the other or following day

अन्यतरेद्युः on one of the two days

इतरेद्युः on another day

इदानीम् just now

उत्तरेद्युः on the following day

उभयद्युः } on both days
उभयेद्युः }

ऐषमः during this year

परुत् last year

परारि the year before the last

---

## १०. अन्यानि कानिचित् अव्ययानि

अकस्मात् suddenly, all at once.

अचिरम् } Not long since, recently, quickly
अचिरेण }
अचिराय }
अचिरात् }

अग्रे before

अङ्ग well

अजस्रम् constantly

अञ्जसा correctly, justly

अतीव exceedingly

अथ } then, afterwards
अथो }

अथ किम् what else, yes

अथवा or, rather

अद्धा truely, certainly

अधः } below, down
अधस्तात्

अनिशम् incessantly ?

अन्तः in, into

अन्ततः at last, from the end

अन्तरा } except, without
अन्तरेण

अन्यच्च } moreover, besides
अपरंच

अपि even

अभितः near, close by

अभीक्ष्णम् frequently

अम् quickly, little

अमा together with, in company with

अरम् quickly

अर्वाक् before

अलम् enough of, sufficient for

अवश्यम् necessarily

असकृत् repeatedly

अहर्निशम् day and night

अह्नाय at once

आरात् near, at a distance

आविः openly, before the eyes

आम् yes

आहत्य on the whole

आहोस्वित् } or
उत
उताहो

इति thus, in this manner

इतिह In conformity to tradition

इव like, as

ईषत् slightly

उच्चैः loudly

उत्तरम् then

उपरि } on, over
उपरिष्टात्

उपांशु secretly, in private

उषा early in the morning, at dawn

ऋतम् truly

ऋते without, except

एकपदे at once, suddenly

एव just, quite

एवम् thus, so

ओम् so be it, yes

कच्चित् } I trust, hope
कच्चन }

कथञ्चन } with great difficulty
कथञ्चित् }

कथंनाम how indeed, how possibly

कदाचन } once
कदाचित् }

कामम् to one's satisfaction

किञ्चिल what a pity

किञ्च moreover, again

किञ्चन } to a certain degree, little, some what
किञ्चित् }

किन्तु but, yet, however nevertheless

किन्नु what indeed, whether

किमुत how much more

किंवा or

किंस्वित् what, how

किल verily, indeed

किमु what then, how much more

कृतम् enough, no more of

केवलम् only, merely simply

क्वचन } in some place
क्वचित् }
कुत्रचित् }
कुत्रचन }

खलु certainly, surely

च and

चित् } particles, added to किं and its derivatives
चन }

*e.g.*, कश्चित्-काचन
Meaning : a certain.

चिरम् } for a long time
चिरेण }
चिराय }
चिरात् }
चिरस्य }

चिररात्राय for a period of many nights.

चेत् if

जातु perhaps

जोषम् silently

झटिति } quickly, at once
झडिति }
झगिति }

तथा च so

तथापि even then, still
तथा हि as for instance
तथैव even so, just so
तदनु then
तरसा forcibly
तावत् so much
तिरः } crookedly
तिर्यक् } across
तु but
तूष्णीम् silently
दिवा by day
दिष्ट्या fortunately
दुष्ठु ill, in a bad manner
दूरम् deeply
दोषा at night
द्राक् quickly, forthwith
धिक् what a pity
ध्रुवम् surely, certainly
नक्तम् by night
न not
ननु indeed, surely
न कदाचित् never
न हि not at all
नाना in various ways
नाम by name, indeed
निकषा near, close by
निकामम् very much
नितान्तम् excessively
नीचैः low, below, gently
नूनम् certainly
न चेत् } if not
नोचेत् }
परम् } but
परंतु }
परितः around
पर्याप्तम् to one's satisfaction, sufficiently
पश्चात् behind, backwards, at last
पुनः again
पुनःपुनः again and again
पुरः } in front
पुरस्तात् }
पृथक् individually
प्रकामम् exceedingly
प्रत्युत on the contrary
प्रसह्य forcibly
प्राक् before, at first
प्रातः in the morning
प्राध्वम् crookedly
प्रायः } mostly
प्रायेण }

बलवत्
बलात् } forcibly, powerfully

बहिः out, beside

भूयः exceedingly

भृशम् greatly

मङ्क्षु quickly

मनाक् a little

मा
मास्म } do not

माकिम् except

माचिरम् without delay

मिथः
मिथो } to each other, secretly

मिथ्या wrongly

मुधा to no purpose

मुहुः often

मृषा falsely

यदि if

यावत् as much as, till

युगपत् simultaneously

वा or

विना without

विहायसा वृथा high up in the sky

वृथा in vain

वै verily, to be sure

शनैः gently, slowly

शश्वत् always

सततम्
सन्ततम् } always

सपदि at once

समम् equally

समन्ततः on all sides

समया at a fixed time

समीपम्
समीपे } near

समीचीनम् well, properly

साम्यक् well, in a good manner

सह together with

सहसा at once

संवत् year

साकम् with

साचि crookedly, in a side-long manner

सार्धम् with

साक्षात् in a person

सामि half

साम्प्रतम् now, fitly

सायम् in the evening

सुष्ठु well

स्थाने rightly

स्वयम् oneself

स्वः heaven

हंहो ho, hallo

हन्त alas

हा ho

हि because, indeed

हिरुक् without, except.

---

## शब्दार्थकोशः—Glossary

This follows शब्द order :—

---

१. देवः God

मुकुन्दः Vishnu

शिवः Siva

हरः Siva

२. रविः Sun

कविः poet

मुनिः sage

विधिः fate

श्रीपतिः Lord Vishnu

५. शम्भुः Siva

विष्णुः Vishnu

भानुः Sun

सूनुः son

६. धाता the creator

कर्ता doer

भर्ता husband

वक्ता speaker

नप्ता grand-son

७. भ्राता brother

जामाता son-in-law

देवा husband's brother

ना man सव्येष्टा charioteer

११. माला a garland

सीता Sita

क्षमा patience

लज्जा shame

अम्बा, अक्का, अल्ला } mother

१२. श्रुतिः hearing, वेदः

रुचिः taste

बुद्धिः intelligence

१३. गौरी—पार्वती
वाणी speech, सरस्वती
सखी female friend
देवी godess
कर्त्री doer
दात्री giver
लक्ष्मीः the godess of wealth
तरीः boat
तन्त्रीः lute.

१४. ह्रीः shame
धीः intellect
भीः fear

१६. तनुः the body
इषुः arrow
रज्जुः rope, cord
चञ्चुः beak

१७. चमूः army
श्वश्रूः mother-in-law

१८. भ्रूः eye-brow
सुभ्रूः lovely woman

२०. याता husband's brother's wife
दुहिता daughter
ननान्दा husband's sister

२४ ज्ञानम् knowledge
वनम् forest
धनम् wealth
नेत्रम् eye

२६. अस्थि bone
सक्थि thigh
अक्षि eye

२७. अनादि having no beginning
सुरभि fragrant

२८. अम्बु water
अश्रु tear
वस्तु thing, real thing
दारु timber

२९. कर्तृ that which does or makes
गन्तृ that which goes
वक्तृ that which speaks

३०. मृदु soft
पृथु broad, wide
पटु clever
लघु short

३१. पयोमुक् cloud
सुवाक् eloquent

३२. भिषक् physician

३२. हुतभुक् fire
ऋत्विक् sacrifiicial priest

३३. सम्राट् a paramount soveriegn
परिव्राट् ascetic
विश्वसृट् the creator of the Universe

३४. भूभृत् king
कर्मकृत् one who does any business
विश्वजित् name of a particular sacrifice
सोमसुत् soma distiller
ददत् giving
दधत् holding
बिभ्यत् fearing
जक्षत् eating
जाग्रत् watching
शासत् ruling
चकासत् shining
दरिद्रत् being poor

३५. गच्छन् going
गमिष्यन् willing to go
हरन् taking away
हरिष्यन् willing to take away
कुर्वन् doing
करिष्यन् willing to do
कथयन् telling
कथयिष्यन् willing to tell

३६. बुद्धिमान् intelligent
धनवान् rich
कृतवान् he who has done
भगवान् divine
यावान् as much as
तावान् so much
कियान् how much
इयान् of this extent
मघवान् Indra

३८. दिविषत् God
शास्त्रवित् well-versed in Sastras
तमोनुत् the Sun

३९. मूर्धा the head
तक्षा carpenter
सुनामा auspicious named
महिमा greatness
पीवा fat
अणिमा minuteness
गरिमा greatness
लघिमा thinness

४०. ब्रह्मा the Creator
यज्वा one who performs sacrifices
सुपर्वा God
अध्वा way
४४. मन्थाः churning handle
४५. गुणीः good natured
धनी wealthy man
शशी the Moon
४७. ईदृक् of this kind
मादृक् of my type
त्वादृक् of your type
अस्मादृक् of our type
युष्मादृक् of your type
भवादृक् of your honour's type
तत्वदृक् he who has seen the truth
४८. रत्नमुट् one who steals jewels
सितत्विट् one whose lustre is white
४९. चन्द्रमाः the Moon
सुमनाः the good-minded
पुरोधा a priest
५०. गरीयान् heavier
स्थवीयान् greater
५१. ऊचिवान् one who has said
उपेयिवान् one who has approached
सेदिवान् one who has sat
तस्थिवान् one who has stood
५४. भूरुट् tree
महीरुट् tree
५५. त्वक् skin, bark
रुक् lustre
५७. हरित् green
तटित् lightning
५८. सम्पत् prosperity
आपत् adversity
मृत् earth
५९. युत् war, battle
समित् holy stick
वीरुत् creeping plant
मर्मवित् one who knows the secret
६०. दामा rope, garland
६१. धूः yoke

पूः town, a city

६६. विपाट् name of a river in Punjab, now called Beas

६७. त्विट् lustre

७१. भास्वत् shining
गतवत् one who went
सुन्वत् extracting
तन्वत् stretching
रुन्धत् preventing
क्रीणत् buying
अदत् eating
बृहत् great
पृषत् a drop of water

७४. जुह्वत् sacrificing
शासत् ruling
जक्षत् eating
चकासत् shining
दरिद्रत् one becoming [poor
जाग्रत् being awake

७५. पृच्छत् asking
मुञ्चत् releasing
यात् going
भात् shining
करिष्यत् one who will do

७६. भवत् being
दीव्यत् playing
चोरयत् stealing
चिकीर्षत् desiring to do
पुत्रीयत् desiring for child

७९. धाम lustre, a house
व्योम the sky
हेम gold

८०. शर्म happiness
वर्म armour
वेश्म house
सद्म house

८२. कुशली happy
वाग्मी orator
दण्डी one having stick

८४. एतादृक् of this kind
ईदृक् of this kind
कीदृक् of what kind ?

८५. रत्नमुट् one stealing jewels

८६. तपः penance
यशः fame, glory
गरीयः heavier
श्रेयः good

८७. सर्पिः clarified butter, ghee

ज्योतिः light, lustre

रोचिः light

८८. आयुः life

चक्षुः the eye

धनुः bow

वपुः body

८९. तस्थिवस् that which has stood

ऊचिवस् that which has said

उपेयिवस् that which has approached

९०. अम्भोरुह् lotus

९१. एकतर one of the two

एकतम one of many

१५०. अजरः } one not
विजरः } getting old

१५१. पाद foot

१५२. दन्त tooth

१५३. मास month

१५४. सोमपाः one who quaffs the Soma juice

शङ्ख्माः conch blower

१५५. विश्वपाः protector of the world

१५७. सुधीः wise

शुद्धधीः pure-minded

सुश्रीः fortunate

नीः leader, guide

१५८. ग्रामणीः the chief of a village

१६०. बहुश्रेयसी one having many good wives

१६३. पुनर्भूः widow remarried

खलपूः cleaner

१६४. स्वयम्भूः self-born

१६८. पराङ् situated beyond adverse

अवाङ् stooping

१६९. न्यङ् going down-wards

सम्यङ् companion

१७४. द्विपात् having two legs

व्याघ्रपात् tiger-footed

पूषा अर्यमा the Sun

१८६. ब्रह्महा the killer of a Brahmin

आत्महा one who kills his own soul

१८६. हव्यवाट् fire
भारवाट् bearer of burden

१८८. धुक् one who burns
धिक् one who anoints

१८९. मुक्-ट् one who swoons
स्नुक्-ट् one who vomits
स्निक्-ट् one who loves

१९५. प्राक् eastern

१९६. प्रत्यक् western

१९७. अन्वक् following

१९८. उदक् northern

१९९. तिर्यंक् going away

२००. धुक् that which milks

२०१. ध्रुक्-ट् that which bears malice

२०२. स्वनडुत् that which has a fine bull

॥ शब्दमञ्जरी सम्पूर्णा ॥

॥ शुभं भूयात् । समस्तसन्मङ्गळानि सन्तु ॥

---

॥ शब्दविद्यापारङ्गतत्वसिद्धिरस्तु ॥

---

## USEFUL TEXT BOOKS FOR COLLEGE STUDENTS

Text in Sanskrit with English Translation, Exhaustive Notes, Model Questions etc.,

**By, T.K. RAMACHANDRA AIYAR, M.A., B.O.L.**

### BOOKS ON SANSKRIT PROSE

| | Rs. P. |
|---|---|
| बालारामायणम्-बाल-अयोध्या-आरण्यकाण्डा:- A Simple Prose Version of Valmiki Ramayana retaining thr idioms of the original | 20.00 |
| Do किष्किन्धा सुन्दर-युद्धकाण्डा:- Part II | 20.00 |
| चन्दापीडचरितम - The story of Bana's Kadambari Concisely written, Text with Eng., Trans. | 38.00 |
| English Translation and Notes on Kadambari Sangraham- Mahasveta Vritanta (Without Text) | 20.00 |
| Do Sukanasa Upadesa | 10.00 |
| मृच्छकटिक नाटक कथासंग्रह: | 35.00 |
| A short History of Sanskrit Literature - Covering the whole range of Vedic, Sutras, Classical periods, Maha Kavyas, Darsanas etc. | 40.00 |
| कुवलायानन्द:-श्रीमदप्पथ्यदीक्षित विरचित: (वृत्तिरहित:) 50 selected Alankaras with the commentary "Samanvaya" in Sanskrit and English | 20.00 |
| लघुवृत्तरत्नाकर:- A Small Hand Book on 40 selected commonly used classical metres with English Notes and illustrations from Popular Kavyas for the use of University Students. | 20.00 |
| A Guide to the Study of Comparitive Philogy with special reference to Sanskrit | 60.00 |